श्री. भा. न. टी. २

ॐश्रीगणेशायनमः ॐगुणायंगुणानावासैवृग्रएतेकरुणानिधिं नप्रहंप्रार्णीयामिपरमानंदमाधवं १ त्रिगुणाभिरध्यायैर्वैवस्वतसुतान्वयः नवमेकुलसंकीर्तिप्रसंगाद्वितन्यते २ एवमुक्तोष्टमस्कंधेसद्धर्मःसत्वशोधकः कर्तृपालकवक्त्रादिमन्वादीनांनिरूपणेः ३ सद्धर्मश्रुद्धसत्वानामतएवेशसत्कथा सूर्यसोमान्वयाख्या

त्रियार

श्रीशुकउवाच मन्वंतराणिसर्वाणित्वयोक्तानिश्रुतानिमे वीर्याण्यनंतवीर्यस्यहरेस्तत्रकृतानिच १ योसौसत्यव्रतोनामराजर्षिर्द्रविडेश्वरः ज्ञानंयोतीतकल्पांतेलेभेपुरुषसेवया २ सवैविवस्वतःपुत्रोमनुरासीदितिश्रुतं त्वत्तःतस्यसुताःप्रोक्ताइक्ष्वाकुप्रमुखान्नृपाः ३ तेषांवंशंपृथग्ब्रह्मन्वंश्यानुचरितानिच कीर्तयस्वमहाभागनित्यंशुश्रूषतांहिनः ४ येभूतायेभविष्याश्चभवंत्यद्यतनाश्चये तेषांनःपुण्यकीर्तीनांसर्वेषांवदविक्रमान् ५ श्रीसूतउवाच एवंपरीक्षिताराज्ञासदसिब्रह्मवादिनां पृष्टःप्रोवाचभगवान्शुकःपरमधर्मवित् ६ श्रीशुकउवाच श्रूयतांमानवोवंशःप्राचुर्येणपरंतप नशक्यतेविस्तरतोवक्तुंवर्षशतैरपि ७ ॥

कर्माणि ४

नैरघुनासंचालोच्यते ४ तत्रचत्रयोदशभिरध्यायैःसूर्यवंशोनुवर्ण्यते एकादशभिरध्यायैःसोमवंशस्ततःपरैः तत्रतुप्रथमेध्यायेवैवस्वतसुतान्वये सोमवंशप्रवेशोतोस्यद्युम्नस्त्रीत्वमुच्यते ५ उक्तानुवादपूर्वकंवैवस्वतमनोर्वंशंपृच्छति मन्वंतराणीतिपंचभिः ७ ॐतत्सद्रामायरामचंद्रायनमोनमः

ननु कं वंशं वक्ष्ये पूर्वोक्तमेव तावद्वंशप्रवर्तकं श्रीनारायणमारभ्य ब्रह्मणः स्मारयति परावरेषामिति पंचभिः ८।११ नाभागं चेति पाठेऽपि नभग एव नाभागः १२ सूर्यवंश्यस्य सुद्युम्नस्य स्त्रीत्वे सति बुधात्पुरूरवःप्रभृतिसोमवंशसंचारं वक्ष्ये सप्रस्तावमिलोपाख्यानमाह अप्रजस्य मनोः पूर्वमित्यादिना यावदध्यायसमाप्ति पूर्वमिक्ष्वाकुप्रभृतीनामुत्पत्तेः

परावरेषां भूतानामात्मा यः पुरुषः परः स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किंचन ८ तस्य नाभेः समभवत्पद्मकोशो हिरण्मयः तस्मिन्जज्ञे महाराज स्वयंभूश्चतुराननः ९ मरीचिर्मनसस्तस्य जज्ञे तस्यापि कश्यपः दाक्षायण्यां ततोऽदित्यां विवस्वानभवत्सुतः १० ततो मनुः श्राद्धदेवः संज्ञायामास भारत श्रद्धायां जनयामास दश पुत्रान्स आत्मवान् ११ नरिष्यंतं पृषध्रं च नभगं च कविं विभुः १२ अप्रजस्य मनोः पूर्वं वसिष्ठो भगवान्किल मित्रावरुणयोरिष्टिं प्रजार्थमकरोद्विभुः १३ तत्र श्रद्धा मनोः पत्नी होतारं समयाचत दुहित्रर्थमुपागम्य प्रणिपत्य पयोव्रता १४ प्रेषितोऽध्वर्युणा होता ध्यायंस्तत्समाहितः हविषि व्यचरत्तेन वषट्कारं गृणन्द्विजः १५ होतुस्तद्व्यभिचारेण कन्येला नाम साभवत् तां विलोक्य मनुः प्राह नातितुष्टमना गुरुं १६ भगवन्किमिदं जातं कर्म वो ब्रह्मवादिनाम् विपर्ययमहो कष्टं मैवं स्याद्ब्रह्मविक्रिया १७ यूयं मन्त्रविदो युक्तास्तपसा दग्धकिल्बिषाः कुतः संकल्पवैषम्यमनृतं विबुधेष्विव १८ तन्निशम्य वचस्तस्य भगवान्प्रपितामहः होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनंदनं १९ एतत्संकल्पवैषम्यं होतुस्ते व्यभिचारतः तथापि साधयिष्ये ते सुप्रजास्त्वं स्वतेजसा २०

प्राक् १३ दुहित्रर्थं मम कन्या यथा भवेत्तथा यजेति होतारं सम्यक् अयाचत पय एव व्रतमाहारो नियतो यस्याः अध्वर्युणा हे होतर्यजेति प्रेषितो होता तेन गृहीते हविषि सति तत् तथा प्रार्थितं ध्यायन् व्यचरत् अयजत् पाठान्तरे तत् आध्यायन् वाचा वषट्कारं गृणन् वौषडिति उच्चारयन् १५ १६ ब्रह्मविक्रियां मंत्राद्यन्यथात्वं १७ १८ प्रपितामहो वा

व

श्री० भाग० टी० २

२१ विगतंतिमिरंआभासःप्रभायस्यप्रकाशोयास्तुतथाभूतादिशःकुर्वंतः २२ प्रसंगंरमणाभिनिवेशंस्त्रीप्रसं।

एवंव्यवसितोराजन्भगवान्समहायशाः अस्तौषीदादिपुरुषमिलायाःपुंस्त्वकाम्यया २१ तस्मैका
मवरंतुष्टोभगवान्हरिरीश्वरः ददाविलाभवत्तेनसुद्युम्नःपुरुषर्षभः २२ सएकदामहाराजवि
चरन्मृगयांवने वृतःकतिपयामात्यैरश्वमारुह्यसैंधवम् २३ प्रगृह्यरुचिरंचापंशरांश्चपरमाद्भुता
न् दंशितोनुमृगंवीरोजगामदिशमुत्तरां २४ सुकुमारंवनंमेरोरधस्तात्प्रविवेशह यत्रास्तेभग
वान्शर्वोरममाणःसहोमया २५ तस्मिन्प्रविष्टएवासौसुद्युम्नःपरवीरहा। अपश्यत्स्त्रियमात्मान
मश्वंचवडवांनृप २६ तथातदनुगाःसर्वेआत्मलिंगविपर्ययं दृष्ट्वाविमनसोऽभूवन्वीक्षमाणाः
परस्परं २७ राजोवाच कथमेवंगुणोदेशःकेनवाभगवान्कृतः प्रश्नमेनंसमाचक्ष्वपरंकौतूह
लंहिनः २८ शुकउवाच एकदागिरिशंद्रष्टुमृषयःतत्रसुव्रताः दिशोवितिमिराभासाःकुर्वं
तःसमुपागमन् २९ तान्विलोक्यांबिकादेवीविवासाव्रीडिताभृशं भर्तुरंकात्समुत्थायनीवीमा
श्वथपर्यधात् ३० ऋषयोपितयोर्वीक्ष्यप्रसंगंरममाणयोः निवृत्ताःप्रययुस्तस्मान्नरनाराय
णाश्रमं ३१ तदिदंभगवानाहप्रियायाःप्रियकाम्यया स्थानंयःप्रविशेदेतत्सवैयोषिद्भवेदिति ३२
ततऊर्ध्वंवनंतद्वैपुरुषावर्जयंतिहि ॥

ग्र५

गदर्शनकलुषितमनसः संतः तत्प्रसंगाक्षूसंनरनारायणाश्रमंप्रययुः ३२ ॥ ॐनमःरामाय॥

शार्दूलोव्याघ्रः ४ प्रलीनाऽद्रुगणायस्मिन्समयेवघ्रोःकपिलायाणो ६ गांकामनोनजग्राहेतिस्थापयितं
त्र्यकमधवाणाइत्यायुक्त ७ सुप्तायांप्रभातायांनिशि ८ तत्रवंरक्षितुंनभविताऽपितस्मृद्राभवितेति ९
एकदामुनिशार्दूलो निशिवर्षति विधायानागाव इत्याशीलत्ताव भूमदुंदे इत्यर्थः
१ एकाजग्राहवलवान्गाचुक्रोशभयातुरा तस्यास्तत्कंदितंश्रुत्वा पृषध्रोभिससारह ५ शार्दूलमा
दायतरसाप्रलीनोद्रुगणोनिशि अज्ञानन्नहंन्बभ्रोःशिरःशार्दूलशंकया ६ व्याघ्रोपिह्रकोशृ
वणोनिशिनिशाग्राहतस्ततः निश्चक्रामसुसंभीतोरक्तपथिमहीतलेजन ७ मन्यमानोहतंव्याघ्र
पृषध्रःपरवीरहा अद्राक्षीत्स्वहतांबभ्रुं व्युष्टायांनिशिदुःखितः ८ तंशशापकुलाचार्यःकृता
गसमकामतः नतत्ववंधुःशूद्रस्त्वंकर्मणामविताऽमुना ९ एवंशप्तस्तुगुरुणाप्रत्यगृह्णा
त्कृतांजलिः अधारयद्व्रतंवीरऊर्ध्वरेतामुनिप्रियं १० वासुदेवेभगवतिसर्वात्मनिपरेमले एकां
तित्वंगतोभक्त्यासर्वभूतसुहृत्समः ११ विमुक्तसंगःशांतात्मासंयताक्षोऽपरिग्रहः यद
च्छयोपपन्नेनकल्पयन्वृत्तिमात्मनः १२ आत्मन्यात्मानमाधायज्ञानतृप्तःस
माहितः विचचारमहीमेतांजडांधबधिराकृतिः १३ एवंवृत्तो
वनंगत्वादृष्ट्वादावाग्निमुत्थितं तेनोपयुक्तकरणोब्रह्म
प्रापपरंमुनिः १४ कविःकनीयान्विषयेषुनिःस्पृहो
विसृज्यराज्यंसहबंधुभिर्वने निवेश्यचित्तेपुरु
षंस्वरोचिषंविवेशकैशोरवयाःपरंगतः १५

उपयुक्तकरणःदग्धदेहः ॥४ केचेरुधिरंप्राणानामवदित्याहकविरिति बंधुभिःसहराज्यंविसृज्य॥
॥५ राम राम राम ॥

प्रासंगिकमप्याह तस्य तन्मत्र्यवर्णायति सा चेति अनुचरीसंयुक्ते तिवक्तव्ये भूतपूर्वगत्या पुंस्त्वनिर्देशः २२ आशायन् इष्टक
न् ३ २९ नाभ्यनंदन् स्त्रीत्वेनेलजयामास मासं निलीयावस्थानात् ४२ इति श्रीभावार्थदीपिकायां नवमस्कन्धे

सा वानुचरसंयुक्ता विचचार वनाद्वनं ३३ अथ तामाश्रमाभ्याशे चरंतीं प्रमदोत्तमां स्त्रीभिः परिवृतां वीक्ष्य चकमे भगवान् बुधः ३४ सापि तं चकमे सुभ्रूः सोमराजसुतं पतिं स तस्यां जनयामास पुरूरवसमात्मजं ३५ एवं स्त्रीत्वमनुप्राप्तः सुद्युम्नो मानवो नृपः सस्मार स कुलाचार्यं वसिष्ठमिति शुश्रुम ३६ स तस्य तां दशां दृष्ट्वा कृपया भृशपीडितः सुद्युम्नस्याशयन् पुंस्त्वमुपाधावत शंकरं ३७ तुष्टस्तस्मै स भगवान् ऋषये प्रियमावहन् स्वां च वाचं ऋतां कुर्वन्निदमाह विशांपते ३८ मासं पुमान् स भविता मासं स्त्री तव गोत्रजः इत्थं व्यवस्थया कामं सुद्युम्नोऽवतु मेदिनीं ३९ आचार्यानुग्रहात्कामं लब्ध्वा पुंस्त्वं व्यवस्थया पालयामास जगतीं नाभ्यनंदन् स्म तं प्रजाः ४० तस्योत्कलो गयो राजन् विमलश्च त्रयः सुताः दक्षिणापथराजानो बभूवुर्धर्मवत्सलाः ४१ ततः परिणते काले प्रतिष्ठानपतिः प्रभुः पुरूरवस उत्सृज्य गां पुत्राय गतो वनं ४२ इति श्रीभागवते नवमस्कन्धे इलोपाख्याने प्रथमोऽध्यायः १ श्रीशुक उवाच एवं गतेऽथ सुद्युम्ने मनुर्वैवस्वतः सुते पुत्रकामस्तपस्तेपे यमुनायां शतं समाः १ ततोऽयजन्मनुर्देवमपत्यार्थं हरिं प्रभुं इक्ष्वाकुपूर्वजान्पुत्रान् लेभे स्वसदृशान्दश २ पृषध्रस्तु मनोः पुत्रो गोपालो गुरुणा कृतः पालयामास गा यत्तो रात्र्यां वीरा

ये प्रथमोऽध्यायः द्वितीये मनुपुत्राणां द्वादशौविरागतः करूषकादिवंशानां वर्णना हलक्रमात् ॥
वैवस्वतः इक्ष्वाकुः पूर्वजा येषां ता २ ननु पृषध्रस्य वंशो नाभवदिति सहेतुकमाह पृषध्रस्त्वित्यादिना क
विः कनीयान् ... ततः स्पष्टो जाबालो वीरासनं तदेवव्रतं यस्य यत्तः अवहितः

इक्ष्वाकुर्नृगसर्यातिदिष्टधृष्टकरूषकाः नरिष्यंतः पृषध्रश्च नभागश्च कविर्विभुः ३ मूलत्रुटि।

प्रणिहैते४ सुद्युम्न४

पत्योप४ =गा४

१९ ब्रह्मभूयं ब्राह्मण्यं गतं नृगस्य वंशः पुत्रः सुमतिः ततो भूतज्योतिः ततो वसुः १७ ओघवतः पिता तत्पुत्रः ओघवान् ।
वेमथः तदेव त्रिभिः श्लोकैः करूषपृषध्रनृगाणां वंशा उक्ताः नरिष्यन्तस्य वंशमाह चित्रसेन इति सार्द्धैस्त्रिभिः त
त इत्यादेर्यत्राधिकं स्यात् तत्रानन्तर्येण तत इत्यादिपदं व्याख्येय यत्र तु न्यूनं तत्र पूर्वस्य परस्य चान्वयेन गतादिति

करूषान्मानवादासन्कारूषाः क्षत्रजातयः उत्तरापथगोप्तारो ब्रह्मण्या धर्मवत्सलाः १८ धृष्टात्तु धा
र्ष्टमभूत्क्षत्रं ब्रह्मभूयं गतं क्षितौ नृगस्य वंशः सुमतिर्भूतज्योतिस्ततो वसुः १७ वसोः प्रतीकस्तत्पुत्र ओघ
वानोघवत्पिता कन्या चौघवती नाम सुदर्शन उवाह तां १८ चित्रसेनो नरिष्यन्तादृक्षस्तस्य सुतोऽभवत्
तस्य मीढ्वांस्ततः कूर्च इन्द्रसेनस्तु तत्सुतः १९ वीतिहोत्रस्त्विन्द्रसेनात्तस्य सत्यश्रवा अभूत् उरुश्रवाः सु
सुतस्तस्य देवदत्तस्ततोऽभवत् २० ततोऽग्निवेश्यो भगवानग्निः स्वयमभूत्सुतः कानीन इति विख्यातो जा
तूकर्ण्यो महानृषिः २१ ततो ब्रह्मकुलं जातमाग्निवेश्यायनं नृप नरिष्यन्तान्वयः प्रोक्तो दिष्टवंशमतः
शृणु २२ नाभागो दिष्टपुत्रोऽन्यः कर्मणा वैश्यतां गतः भलन्दनः सुतस्तस्य वत्सप्रीतिर्भलन्दनात् २३
वत्सप्रीतेः सुतः प्रांशुस्तत्सुतं प्रमतिं विदुः खनित्रः प्रमतेस्तस्माच्चाक्षुषोऽथ विविंशतिः २४ विविंश
तेः सुतो रम्भः खनिनेत्रोऽस्य धार्मिकः करन्धमो महाराज तस्यासीदात्मजो नृप २५ तस्यावीक्षित्सु
तो यस्य मरुत्तश्चक्रवर्त्यभूत् संवर्तोऽयाजयद्यं वै महायोग्यङ्गिरःसुतः २६ मरुत्तस्य यथा यज्ञो न त
थान्यस्य कश्चन सर्वं हिरण्मयं त्वासीद्यत्किञ्चिच्चास्य शोभनम् २७ अमाद्यदिन्द्रः सोमेन दक्षिणाभिर्द्वि
जातयः मरुतः परिवेष्टारो विश्वेदेवाः सभासदः २८ ॥

व्याख्येयं १९ अग्निवेश्य एव कानीन इति जातूकर्ण्य इति च विख्यातः २२ दिष्टस्य पुत्रो नाभागो वक्ष्यमाणान्ना
भागादन्य इति भाति खुदामार्थ अनुवादमात्रं २६ अङ्गिरसः सुतो महायोगी संवर्तो यमयाजयत् २९ अस्य
यत्किञ्चिन्मात्रादिकमस्ति तत्तु सर्वं हिरण्मयं शोभनमासीत् २७ अमाद्यत् अहृष्यत् २८ ॥ ॥

३० यतः यस्य तृणाविंदोः पुत्रोऽभवत् ३१ ३२ अयं श्लोकः कन्यावंशप्रकीर्तनार्थः तथाहि यस्यामिड विडायां विश्रवा नैयनदेवश्रवाः सुतं जनयामास लोके वैश्रवणाख्य इडविड इति प्रसिद्धः तानेवाह विशाल इति तस्य तृणाविंदोः सुताः ३३ सहदेवजः देवजेन सहितः प्राचीनटीकानामा सत्वमात्रेणार्थः स्तुसएव ३४ वैशालभूपालस्यान्वये जाताः ३६ इति श्रीभागवते नवमस्कंधे द्वितीयोऽध्यायः २ तृतीये मनुपुत्रस्य शर्या

मरुत्तस्य दमः पुत्रः तस्यासीद्राज्यवर्द्धनः सुधृतिस्तत्सुतो जज्ञे सौधृतेयो नरः सुतः २९ तत्सुतः केवलस्तस्माद्धुंधुमान्वेगवांस्ततः बंधुस्तस्याभवद्यस्य तृणाविंदुर्महीपतिः ३० तं भेजेऽलंबुषा देवी भजनीयगुणालयं वराप्सरा यतः पुत्राः कन्या चेडविडाभवत् ३१ तस्यामुत्पादयामास विश्रवा धनदं सुतम् प्रादाय विद्यां परमामृषिर्योगेश्वरात्पितुः ३२ विशालः शून्यबंधुश्च धूम्रकेतुश्च तत्सुताः विशालो वंशकृद्राजा वैशालीं निर्ममे पुरीं ३३ हेमचंद्रः सुतस्तस्य धूम्राक्षस्तस्य चात्मजः तत्पुत्रात्संयमादासीत्कृशाश्वः सहदेवजः ३४ कृशाश्वात्सोमदत्तोऽभूद्योऽश्वमेधैरिडस्पतिं इष्ट्वा पुरुषमापाग्र्यां गतिं योगेश्वराश्रितः ३५ सौमदत्तिस्तु सुमतिः तत्सुतो जनमेजयः एते वैशालभूपालाः तृणाविंदोर्यशोधराः ३६ इति श्रीभागवते नवमस्कंधे द्वितीयोऽध्यायः २ श्रीशुकः शर्यातिर्मानवो राजा ब्रह्मिष्ठः संबभूव ह यो वा अंगिरसां सत्रे द्वितीयमह ऊचिवान् १ सुकन्या नाम तस्यासीत्कन्या कमललोचना तया सार्द्धं वनगतो ह्यगमच्च्यवनाश्रमं २ ॥

तेः कीर्त्यते अन्वयः यत्र सौकन्यमाख्यानं वैवर्नं च महाद्भुतं ब्रह्मिष्ठो वेदार्थतत्त्वज्ञः तदेवाह यो वा इति द्वितीयमहः द्वितीये ऽहि क्रियमाणं कर्म ऊचिवान् उवाच तस्य वंशमनु नवह्निरानर्त इत्यादिना वक्ष्यति १ आदौ तावत्तत्कन्याचरितमाह सुकन्या नामेत्यादिना २ ॥

५ भार्गवस्य च्यवनस्य अभद्रं अपराधः ५ । ८ मुक्तोऽयं मसकृन्या तं नवानयेन्नु अमानेकति वर्षाणि एतस्या विवाहः कृतो नवेत्यादिवाक्यैः तदभिप्रायं तस्य मुनेरभिप्रायं ज्ञात्वा तस्मै तां दुहितरं प्रादात् ९ । १० हे ईश्वरौ युवां मह्यं वयस्तारुण्यं दत्तं संपादयतं ॥ असोमपयोः सोमपानरहितयोः सोमस्य ग्रहं सोमपूर्णं पात्रं ग्रहीष्यदास्या।

सा सखीभिः परिवृता विचिन्वंत्यंघ्रिपान्वने वल्मीकरंध्रे ददृशे खद्योते इव ज्योतिषी २ ते दैवचोदिता बाला ज्योतिषी कंटकेन वै अविध्यन्मुग्धभावेन सुस्रावासृक् ततो बहिः ३ शकृन्मूत्रनिरोधोऽभूत्सैनिकानां च तत्क्षणात् राजर्षिस्तमुपालक्ष्य पुरुषान्विस्मितोऽब्रवीत् ४ अप्यभद्रं न युष्माभिर्भार्गवस्य विचेष्टितम् व्यक्तं केनापि नस्तस्य कृतमाश्रमदूषणम् ५ सुकन्या प्राह पितरं भीता किंचित्कृतं मया द्वे ज्योतिषी अजानंत्या निर्भिन्ने कंटकेन वै ६ दुहितुस्तद्वचः श्रुत्वा शर्यातिर्जातसाध्वसः मुनिं प्रसादयामास वल्मीकांतर्हितं शनैः ७ [illegible] तदभिप्रायमाज्ञाय प्रादाद्दुहितरं मुनेः कृच्छ्रान्मुक्तस्तमामंत्र्य पुरं प्रायात्समाहितः ८ सुकन्या च्यवनं प्राप्य पतिं परमकोपनम् प्रीणयामास चित्तज्ञाऽप्रमत्तानुवृत्तिभिः ९ कस्यचित्त्वथ कालस्य नासत्यावाश्रमागतौ तौ पूजयित्वा प्रोवाच वयो मे दत्तमीश्वरौ ॥ ग्रहं ग्रहीष्ये सोमस्य यज्ञे वामप्यसोमपोः क्रियतां मे वयोरूपं प्रमदानां यदीप्सितं बाढमित्यूचतुर्विप्रमभिनंद्य भिषक्तमौ निमज्जतां भवानस्मिन्ह्रदे सिद्धविनिर्मिते १२ इत्युक्तो जरया ग्रस्तदेहो धमनिसंततः ह्रदं प्रवेशितोऽश्विभ्यां वलीपलितविग्रहः १३ पुरुषास्त्रय उत्तस्थुरपीच्या वनिताप्रियाः पद्मस्रजः कुंडलिनस्तुल्यरूपाः सुवाससः १४ ॥

मीति युवां सोमेन यद्यपि इत्यर्थः ऐंद्रं वायवं गृह्णातीत्यादिश्रुतद्वादेवतासंबंधात्तयपरयाग्रहणाते यौवापर्यवसायित्वात् ११ बाढमित्यभिनंद्य भवानस्मिन्निमज्जतामित्यूचतुः १२ ह्रदं प्रवेशितः तावपि तमनु ह्रदं गृहीत्वा प्रविष्टावित्यर्थः १४ १५

२

अश्विनौ शरणं ययौ अश्विनौ पृथक्कश्चित्त्वामनतिदर्शयतमिति प्रार्थः १६ १९ प्रलंभितो वंचितः हे असति असंमतं
अनभीष्टं २० हे सतां कुलप्रसूते ते मतिरन्यथा तद्विपर्ययेण कथमवगता अवसन्ना अधःपतितेति केन देवाद

तान्निरीक्ष्य वरारोहा सरूपान्सूर्यवर्चसः अजानती पतिं साध्वी अश्विनौ शरणं ययौ १६ दर्शयित्वाप
तिं तस्यै पातिव्रत्येन तोषितौ ऋषिमामंत्र्य ययतुर्विमानेन त्रिविष्टपं १७ यक्ष्यमाणोऽथ शर्यातिः
च्यवनस्याश्रमं गतः दद्दर्श दुहितुः पार्श्वे पुरुषं सूर्यवर्चसं १८ राजा दुहितरं प्राह कृतपादाभिवं
दनां आशिषश्चाप्रयुंजानो नातिप्रीतमना इव १९ चिकीर्षितं ते किमिदं पतिस्त्वया प्रलंभितो लो
कनमस्कृतो मुनिः यत्त्वं जराग्रस्तमसत्यसंमतं विहाय जारं भजसेऽमुमध्वगं २० कथं मतिस्ते
ऽवगतान्यथा सतां कुलप्रसूते कुलदूषणं त्विदं बिभर्षि जारं यदपत्रपा कुलं पितुश्च भर्तुश्च नयस्यधस्तमः २१
एवं ब्रुवाणं पितरं स्मयमाना शुचिस्मिता उवाच तात जामाता तवैष भृगुनंदनः २२ शशंस पित्रे त
त्सर्वं वयोरूपाभिलंभनं विस्मितः परमप्रीतः तनयां परिषस्वजे सोमेन याजयन्वीरं ग्रहं सोमस्य
चाग्रहीत् असोमपोरप्यश्विनोश्च्यवनः स्वेन तेजसा २४ हंतुं तमाददे वज्रं सद्यो मन्युरमर्षितः स
वज्रं स्तंभयामास भुजमिंद्रस्य भार्गवः २५ अन्वजानंस्ततः सर्वे ग्रहं सोमस्य चाश्विनोः भिषजा
विति यत्पूर्वं सोमाहुत्या बहिःकृतौ २६ उत्तानबर्हिरानर्तो भूरिषेण इति त्रयः शर्यातेरभवन्पुत्रा
आनर्ताद्रेवतोऽभवत् २७ सोऽन्तःसमुद्रे नगरीं विनिर्माय कुशस्थलीं आस्थितोऽभुंक्त विषयानान
र्तादीनरिंदमः २८ ॥

कुलप्रसूतेः ६
८१

कुलदूषणं त्विदमित्यादि २१ सद्यस्तत्क्षणमेव मन्युर्यस्य इंद्रः २५ २८ विषया
न्देशान् अभुंक्त अपालयत् २८ ॥

वा

कुकुद्मी ज्येष्ठो यस्मिंस्तत्र विभुं ब्रह्माणं २९ न लब्धः क्षणो अवसरो येन ३० आद्यं ब्रह्माणं ३१ ते त्वया हृदये कृताः ते
सर्वे कालेन विरुद्धाः संकलितास्त्रिणवसप्तविंशतिः चतुर्युगानि तैः विकल्पितो विभक्तः ३२ यो देवदेवस्यांशोस्ति
तस्मै नररत्नाय देहि ३३ तदेवाह भुव इति ३४ पुण्यजनत्रासात् यक्षभयात् पूर्वमेवमेव त्यक्तं तत् भ्रातृभिः
त्यक्तं ३५ ३६ इति श्रीभावार्थे नवमे तृतीयोध्यायः ३ चतुर्थे मनुपुत्रस्य कथ्यते तत्सुतस्यांबरीष

तस्य पुत्रशतं जज्ञे ककुद्मिज्येष्ठमुत्तमं ककुद्मी रेवतीं कन्यां स्वामादाय विभुं गतः २९ कन्यावरं परिप्र
ष्टुं ब्रह्मलोकमपावृतं आवर्तमाने गांधर्वे स्थितोलब्धक्षणः क्षणं ३० तदंत आद्यमानम्य स्वाभि
प्रायं न्यवेदयत् तच्छ्रुत्वा भगवान्ब्रह्मा प्रहस्य तमुवाच ह ३१ अहो राजन्निरुद्धास्ते कालेन हृदि
ये कृताः तत्पुत्रपौत्रनप्तॄणां गोत्राणि च न शृण्महे कालोभियातस्त्रिणवचतुर्युगविकल्पितः ३२
तद्गच्छ देवदेवांशो बलदेवो महाबलः कन्यारत्नमिदं राजन्नररत्नाय देहि भोः ३३ भुवो भारावता
राय भगवान्भूतभावनः अवतीर्णो निजांशेन पुण्यश्रवणकीर्तनः ३४ इत्यादिष्टोभिवंद्याजं नृ
पः स्वपुरमागतः त्यक्तं पुण्यजनत्रासाद्भ्रातृभिर्दिक्ष्ववस्थितैः ३५ सुतां दत्त्वानवद्यांगीं बलाय
बलशालिने बदर्याख्यं गतो राजा तप्तुं नारायणाश्रमं ३६ इति श्रीभागवते नवमस्कंधे तृती
योध्यायः ३ श्रीशुक उवाच नाभागो नभगापत्यं यं ततं भ्रातरः कविं यविष्ठं व्यभजन्दायं ब्रह्मचारिणमा

विकल्पित

स्य कृत्याप्रतिहतायतः नभगस्य वंशमाह नभगस्यापत्यं नाभागः नाभागादंबरीषो महाभागवतो भू
दिति विवक्षुस्तद्धेतुत्वेन वंशप्रवर्तकस्य नाभागस्य निष्कपटं चरितं तेन तत्प्रीतरुद्रप्रसादमाह यं ततमित्या
दिना ब्रह्मचारिणं बहुकाले गुरुकुले गौरवसंतुष्टिकोसाविसत्वादि भागसमये तस्मै भागमप्रकल्प्य भ्रातरः स
र्वदायं विभज्य गृहीतवंतः पश्चात् गुरुकुलादागतेन नाभागेनार्थितं केचिद्विदासे यविष्ठं प्रतितत्तेन तत्ता पितरं ददेयुः
भजन्ति स्मर्थः १ ॥

श्री॰
भाग॰
टी॰
९

एतदेवश्लोकत्रयेणादर्शयति तत्रनाभागःपृच्छति हेभ्रातरःमह्यंकिमभाक्तकिंभजनंनकृतवन्तःकिंभागंमदर्थंयूयंप्रकल्पि
तवन्तःभ्रातरऊचुः तदाविस्मृतत्वमस्माभिरिदानींतवपितरंभजामत्वंपितरंगृहाणेत्यर्थः सचपितरंगत्वाह त
तहेतातआर्याःज्येष्ठाःममत्वामभाक्षुःभागंकृतःमदीयोभागःत्वमित्यर्थः पाठान्तरेहेत तकिमिदंममाभाङ्क्षुर्भीता
मपितरंतातमपितरंतवेत्युक्तवंतआर्यास्त्वांमह्यंकिमर्थः तथापितैर्भागत्वेनदत्तोऽहंतवत्वत्तोविनोपायंप्रपदे।
पितातमाहहेपुत्रकतत्तैरुक्तंमाआद्रियथाः मनाहंतवमाचैतैःकृतेतस्मिन्नादरंमाकार्षीर्नत्वहंदायइवभोगसा
धनमित्यर्थः ॥ ५

भ्रातरोऽभाङ्क्त किंमह्यंभजामपितरंतव । त्वांममार्यास्तताभाङ्क्षुर्मापुत्रकतदादृथाः ॥ २ ॥ इमेअङ्गिरसः
सत्रमासतेद्यसुमेधसः । षष्ठंषष्ठमुपेत्याहःकवेमुह्यन्तिकर्मणि ॥ ३ ॥ तांस्त्वंशंसयसूक्तेद्वेवैश्व
देवेमहात्मनः । तेस्वर्यन्तोधनंसत्रपरिशेषितमात्मनः ॥ ४ ॥ दास्यन्त्यथततोगच्छतथासकृतवान्यथा ।
तस्मैदत्त्वाययुःस्वर्गंतेसत्रपरिशेषितं ॥ ५ ॥

स्यामीत्याह इमइतिसपादाभ्यांद्वाभ्यांअभिप्लवःषडहस्तेभवतिषष्ठःषडहोभवतीतिविहितेषुषडहेषुप्रा
वर्तमानेषुषष्ठंषष्ठमहःकर्मोपेत्यप्राप्यकर्मणितदङ्गज्ञानसुमेधसोपितेमुह्यन्तिविमुह्यन्तिकवे।
हेविद्वन् २ तान्महात्मनोपित्वमिदमिमारोद्रमितिच येएतेनदक्षिणायन्तीतिवैश्वदेवेसूक्तेशंसययाजय
ततः कर्मणिसमाप्तेसतितेस्वर्यन्तःस्वर्गंगच्छन्तःस्वसत्रपरिशेषितमवशिष्टमात्मनोधनंतेतुभ्यंदा
स्यन्तिअथतस्मात्तानर्च्छेति तथा यादिष्टकवांस्तथातत्कृतवान् यथाततः सत्रपरिशेषितसत्रावशेषि

स्कं॰ ९
अ॰ ४
९

पुरुषः श्रीरुद्रः कृष्णवत् इति दर्शने श्यामी तं कृष्णं दर्शनं यस्य सः वास्तुकं यज्ञभूमिगतं वसु धनं ममेत्युक्त्वा ६ तर्हि स्म
तदेव समेदमिति मानवो नाभाग उवाच पुनश्च रुद्र उवाच नौ आवयोरस्मिन् विवादे ते पितरि प्रश्नः स्यादिति पृष्ट
वानिति शुकोक्तिः ७ पृष्टस्य मनोर्वाक्यं यज्ञवास्तुगतमिति उच्छिष्टमुच्चरितं कदाचित् दत्ता पूर्वं उच्छिष्टभागो वै
रुद्र इति श्रुतेस्तु किं च स देव ईश्वरः सर्वमप्यर्हतीति किं पुनर्यज्ञावशिष्टमित्यर्थः ८ ९ श्रीरुद्र आह यत्त इति १०

तं कश्चित्स्वीकरिष्यन्तं पुरुषः कृष्णदर्शनः उवाचोत्तरतोऽभ्येत्य ममेदं वास्तुकं वसु ६ ममेदमृषिभिर्दत्त
मिति तर्हि स्म मानवः स्यान्नौ ते पितरि प्रश्नः पृष्टवान् पितरं तथा ७ यज्ञवास्तुगतं सर्वमुच्छिष्टमृषयः
क्वचित् चक्रुर्हि भागं रुद्राय स देवः सर्वमर्हति ८ नाभागस्तं प्रणम्याह तवेश किल वास्तुकम्
इत्याह मे पिता ब्रह्मन् शिरसा त्वां प्रसादये ९ रुद्र उवाच यत्ते पितावदद्धर्मं त्वं च सत्यं प्रभाषसे द
दामि ते मन्त्रदृशो ज्ञानं ब्रह्म सनातनम् १० गृहाण द्रविणं दत्तं मत्सत्रपरिशेषितम् इत्युक्त्वान्तर्हितो रु
द्रो भगवान् धर्मवत्सलः ११ य एतत्संस्मरेत्प्रातः सायं च सुसमाहितः कविर्भवति मन्त्रज्ञो गतिं चै
व तथात्मनः १२ नाभागादम्बरीषोऽभून्महाभागवतः कृती नास्पृशद्ब्रह्मशापोऽपि यं न प्रतिहतः
क्वचित् १३ राजोवाच भगवञ्छ्रोतुमिच्छामि राजर्षेस्तस्य धीमतः न प्राभूद्यत्र निर्मुक्तो ब्रह्मदण्डो दुर
त्ययः १४

इदं साख्यानं श्रुतिप्रसिद्धं तथा हि बह्वृचब्राह्मणे नाभानेदिष्टं प्रशंसन्ति नाभानेदिष्टं वै मानवं ब्रह्मचर्यं व
सन्तं भ्रातरो निरभजन् सोऽब्रवीदित्यादि ॥ अस्याख्यानस्य स्मरणे फलमाह य एतदिति आत्मनो गतिं च प्रा
प्नोतीति शेषः १२ क्वचिदपि न प्रतिहतो ब्रह्मशापोऽपि ब्राह्मणेन दुर्वाससा निर्मितः कृत्यानलोऽपि यं नास्पृशत्
यतोऽसौ महाभागवतः अत एव कृती पुण्यवान् १३ तस्य श्रोतुमिच्छामि चरितमिति शेषः ब्रह्मदण्डः कृत्या
नलः न प्राभून्न समर्थो बभूव १४ ॥

श्रियं संपदं विभवमैश्वर्यं चातुलं निरूपमं ॥१५॥ पुंसामतिदुर्लभमपि तत्सर्वं स्वप्नवत्संस्तुतं निरूपितं अनुपादेयं मे
नेन यद्धेतुः विभवस्य निर्वाणं नाशं विद्वान् यतो येन विभवैश्वर्येण तत्राप्नोनवाप्नुमान् न मोहे निमज्जति ॥१६॥ नन्वेवं जा
नतोपि किं भवेदित्यपेक्षायां तत्राह वासुदेव इति भावं भक्तिं प्राप्तः येन भावेनेदं विश्वं लोष्टवदतितुच्छं स्मरेत ॥१७॥ भ
क्तिमेव सर्वेंद्रियाणां भगवत्परत्वकथनेन प्रपंचयति सवा इति त्रिभिः श्रुतिं श्रोत्रं अच्युतस्य सत्कथानामुदये श्रव
णे कारेमस्य सर्वत्रान्वयः ॥१८॥ मुकुंदस्य लिंगानामालया स्थानानि तस्य दर्शने दृशौ नेत्रे श्रीमत्याः तुलस्याः

श्रीशुकः ॥ अंबरीषो महाभागः सप्तद्वीपवतीं महीं ॥ अव्ययां च श्रियं लब्ध्वा विभवं चातुलं भुवि ॥१५॥ मेने
तिदुर्लभं पुंसां सर्वं तत्स्वप्नसंस्तुतं ॥ विद्वान्विभवनिर्वाणं तमो विशति यत्पुमान् ॥१६॥ वासुदेवे भगव
ति तद्भक्तेषु च साधुषु ॥ प्राप्तो भावं परं विश्वं येनेदं लोष्टवत्स्मृतं ॥१७॥ स वै मनः कृष्णपदारविंदयोर्वचां
सि वैकुंठगुणानुवर्णने ॥ करौ हरेर्मंदिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये ॥१८॥ मुकुंद
लिंगालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेंगसंगमं ॥ घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्या रसनां
तदर्पिते ॥१९॥ पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवंदने ॥ कामं च दास्ये न तु कामका
म्यया यथोत्तमश्लोकजनाश्रया रतिः ॥२०॥ एवं सदा कर्मकलापमात्मनः परेऽधियज्ञे भगवत्यधोक्ष
जे ॥ सर्वात्मभावं विदधन्महीमिमां तन्निष्ठविप्राभिहितः शशास ह ॥ ॥

तत्पादसरोजेन यत्सौरभं तत्र स्विव
तदर्पिते तस्मै निवेदितान्नादौ ॥१९॥ कामं स्वकं चंदनादि सेवां दास्ये निमित्ते न तु तत्प्रसादस्वीकाराय न तु कामकाम्य
या विषयेच्छया कथं चकार उत्तमश्लोकजनाश्रया रतिर्यथा भवेत्तथा अनेन तद्भक्तेषु च परं भावं प्राप्त इत्येतत्
स्फुटीकृतं ॥२०॥ सर्वत्रात्मेति भावो भावना यस्मिन् तेनात्मनः स्वकर्मणां कलापं समस्तं भगवति विदधत्
समर्पयन् तन्निष्ठैर्भागवतैर्विप्रैः अभिहितः शिक्षितः सन् महीं शशास पालयामास अनेनापि तद्भक्तेषु च साधुषु भाव

एवं द्विजैः सह विचार्य निश्चिनोति अंभसेति व्रतस्य पारणं समाप्तिं तद्दर्शितं प्राहुः अशितं नेति वाद्भः फलितं च अपोशना।
तितनैवाशितं नैवानशितमिति ४० प्रसमयप्रह्रमेतत ४१। प्रचलत्कंपमानगात्रं यस्य सभ्रुकुट्या कुटिलमाननं यस्य।

अंभसा केवलेनाथ करिष्ये व्रतपारणं प्राहुरब्भक्षणं विप्रा ह्यशितं नाशितं च तत् ४० इत्यपः प्राश्य रा
जर्षिश्चिन्तयन्मनसाच्युतं प्रत्याचष्ट कुरुश्रेष्ठ द्विजागमनमेव सः ४१ दुर्वासा यमुनाकूलात्कृतावश्य
क आगतः राज्ञाभिनंदितस्तस्य बुबुधे चेष्टितं धिया ४२ मन्युना प्रचलद्गात्रो भ्रुकुटीकुटिलाननः बु
भुक्षितश्च सुतरां कृतांजलिमभाषत ४३ अहो अस्य नृशंसस्य श्रियोन्मत्तस्य पश्यत धर्मव्यतिक्रमं वि
ष्णोरभक्तस्येशमानिनः ४४ यो मामतिथिमायातमातिथ्येन निमंत्र्य च अदत्त्वा भुक्तवांस्तस्य स
द्यस्ते दर्शये फलं ४५ एवं ब्रुवाण उत्कृत्य जटां रोषविदीपितः तया स निर्ममे तस्मै कृत्यां कालान
लोपमां ४६ तामापतंतीं ज्वलतीमसिहस्तां पदा भुवं वेपयंतीं समुद्वीक्ष्य न चचाल पदान्नृपः ४७
प्राग्दिष्टं भृत्यरक्षायां पुरुषेण महात्मना ददाह कृत्यां तां चक्रं क्रुद्धाहिमिव पावकः ४८ तदभि
द्रवदुद्वीक्ष्य स्वप्रयासं च निष्फलं दुर्वासा दुद्रुवे भीतो दिक्षु प्राणपरीप्सया ४९ तमन्वधावद्भग
वद्रथांगं दावाग्निरुद्धूतशिखो यथाहिं तथानुषक्तं मुनिरीक्षमाणो गुहां विविक्षुः प्रससार मेरोः
दिशो नभः क्ष्मां विवरान्समुद्रान् लोकान्सपालांस्त्रिदिवं गतः सः यतो यतो धावति तत्र तत्र सुदर्शनं
दुष्प्रसहं ददर्श ५१ अलब्धनाथः स यदा कुतश्चित्संत्रस्तचित्तोऽरणमेषमाणः देवं विरिंचं
समगाद्विधातस्त्राह्यात्मयोनेऽजिततेजसो मां ५२ ॥

स्प. ४२ ४० कृत्यामहिमिव क्रोध दावाग्निरिव ४८ निष्फलमुद्वीक्ष्य ४९ अनुषक्तं पृष्ठतः संसक्तं मेरोः
गुहां विविक्षुः यथावत् ५१ अरणमिषमाणः प्रारणमिच्छन् अजिततेजसः हरेश्चक्रात् ५२ ॥

एतत्सर्वं यस्य भ्रूभंगमात्रेण तिरोभविष्यति कदा क्रीडाया अवसाने तदपि द्विपरार्द्धसंज्ञे काले ५३ अतो वयं सर्वे
यस्य नियममाज्ञां प्रपन्नाः प्राप्ताः सन्तो लोकहितं कथा भवत्येवं तन्नियमं मूर्ध्न्यर्पितं वहामः अतस्तद्भक्तद्रोहिणं
त्वां रक्षितुं न समर्था अहमिति शेषः यन्न दोर्निमसं वैयात ५४ श्रीरुद्रोपि प्रत्याचष्टे वयमिति चतुर्भिः भूम्नि महद्

ब्रह्मोवाच स्थानं मदीयं सह विश्वमेतत्क्रीडावसाने द्विपरार्द्धसंज्ञे भ्रूभंगमात्रेण हि संदिधक्षोः का
लात्मनो यस्य तिरोभविष्यति ५३ अहं भवो दक्षभृगुप्रधानाः प्रजेशभूतेशसुरेशमुख्याः सर्वे व
यं यन्नियमं प्रपन्ना मूर्ध्न्यर्पितं लोकहितं वहामः ५४ प्रत्याख्यातो विरिंचेन विष्णुचक्रोपतापितः दु
र्वासाः शरणं यातः शर्वं कैलासवासिनम् ५५ श्रीशंकर उवाच वयं न तात प्रभवाम भूम्नि यस्मि
न्परेन्येप्यजजीवकोशाः भवंति काले न भवंति हीदृशाः सहस्रशो यत्र वयं भ्रमामः ५६ अहं सनत्कु
मारश्च नारदो भगवानजः कपिलोपांतरतमो देवलो धर्म आसुरिः ५७ मरीचिप्रमुखाश्चान्ये सिद्धेशाः
पारदर्शिनाः विदाम न वयं सर्वे यन्मायां मायया वृताः ५८ तस्य विश्वेश्वरस्येदं शस्त्रं दुर्विषहं हि
नः तमेव शरणं याहि हरिस्ते शं विधास्यति ५९ ततो निराशो दुर्वासाः पदं भगवतो ययौ वैकुं
ठाख्यं यदध्यास्ते श्रीनिवासः श्रिया सह ६० संदह्यमानोजितशस्त्रवह्निना तत्पादमूले पतितः स
वेपथुः आहाच्युतानंत सदीप्सित प्रभो कृतागसं मावहि विश्वभावन ६१ ॥ राम ॥

तिमहत्तमे वा हे यस्मिन्परमे अन्येपि अजा ब्रह्माणः त एव जीवाः तेषां कोशा ब्रह्माण्डानि भूता ब्रह्माण्डविग्रहाः ई
दृशा दृश्यमानब्रह्माण्डप्रमाणा अन्येपि भवंति जायंते नश्यंति यत्र येषु ब्रह्माण्डेषु लोकेशाभिमानिनो वयं
भ्रमामः ५६ नेषु सर्वं तस्यैतद्भ्रमः कुतः तत्राह अहमिति पारदर्शिनः सर्वज्ञा अपि यन्मायया न विद्मः
हे सतामीप्सित मां मां अवहि पाहि ५८ ६० ६१ ॥

किंचयज्ञाधिष्ठानमीश्वरमश्वमेधैरीजे आराधयामास महाविभूत्या उपचितान्यंगानि दक्षिणाश्च येषु तैः वसिष्ठादि-
भिश्च हेतुभूतैर्विस्तृतैः यत्धन्व निर्जलदेशो निरुदके सरस्वतीमभिस्रोतं तेन तस्याः प्रतिलोममित्यर्थः २२ किंच क्रतु-
षु सदस्यादयो गीर्वाणैः सहस्रगणादिभिः तुल्यरूपा व्यदृश्यंत सम्यगिति चतुर्थेनान्वयः नच देवानां निमेषाभा-
वादेव तत्स्वरूपता अनिमिषाश्च व्यदृश्यंत न निमिषंतीति तथा सुयदर्शनानन्दकौतुकेन तेषां निमेषोपरमादिति भा

१२

ईजेश्वमेधैरधियज्ञमीश्वरं महाविभूत्योपचितांगदक्षिणैः ततैर्वसिष्ठासितगौतमादिभिर्धन्वन्यभि-
स्रोतमसौ सरस्वतीं २२ यस्य क्रतुषु गीर्वाणैः सदस्या ऋत्विजो जनाः तुल्यरूपाश्चानिमिषा व्यदृश्यंत
सुवाससः २३ स्वर्गो न प्रार्थितो यस्य मनुजैरमरप्रियः शृण्वद्भिरुपगायद्भिरुत्तमश्लोकचेष्टितं
२४ संवर्धयंति तान्कामाः स्वाराज्यपरिभाविताः दुर्लभा नापि सिद्धानां मुकुंदं हृदि पश्यतः २५ स
इत्थं भक्तियोगेन तपोयुक्तेन पार्थिवः स्वधर्मेण हरिं प्रीणन्सर्वान्कामाञ्छनैर्जहौ २६ गृहेषु दारे-
षु सुतेषु बंधुषु द्विपोत्तमस्यंदनवाजिवस्तुषु अक्षय्यरत्नाभरणायुधादि[illegible] ष्वनंतकोशे-
ष्वकरोदसन्मतिं २७ ॥

वः २३ यस्य यदा येर्मनुजैरपि स्वर्गो न प्रार्थितः तस्य तु का वार्ता २४ आस्तां स्वर्गप्रार्थनशंकापि यद्यतः मुकुं-
दं हृदि पश्यतः तानुजनान्कामाः विषयान्स्म संवर्धयंति न हर्षयंति कथंभूताः स्वाराज्येन स्वरूपसुखेन परिभा-
विताः अतिपाथिताः अत एव सिद्धानामति दुर्लभा यानिति पाठे यान्मनुजान् स्वाराज्ञोसत्राज्ञोपि द्वितीयांतपाठे
मनुष्याणां विशेषणम् पश्यतीति पाठे यसंबंधीयं पश्यतामिति पाठे सिद्धानां विशेषणं एवं श्रीभगवदाराधन-
परस्य तस्य कामा उपेता नैव विचित्रमिति उपसंहरति स इत्थमिति द्वाभ्यां २६ ॥

श्री॰
भाग॰
टी॰
८

नन्वेवंभूतोसौ कथं प्रतिपन्नान् जयेत्तत्राह तस्मादिति २८ तदेवं तस्यैवाराधनादिकं हरिभक्तिं चोक्त्वा ब्रह्मदण्डो यत्र
तत्प्राभूदिति यदुक्तं तदेवं द्वादशीव्रतविषयं कथयन्नाह आरिराधयिषुरित्यादि यावदध्यायसमाप्ति २९ त्रि
र्चयत् अङ्गतामाभावश्चार्थः ३० ३१ ब्राह्मणांश्च पूजयामासेत्यसिद्धार्थान् अप्राप्तकामान् पूजानपेक्षानपि ३२

तस्मादाद्धरिश्चक्रं प्रत्यनीकभयावहं एकान्तभक्तिभावेन प्रीतो भक्ताभिरक्षणं २८ आरिराधयि
षुः कृष्णं महिष्या तुल्यशीलया युक्तः सांवत्सरं वीरो दधार द्वादशीव्रतं २९ व्रतान्ते कार्त्तिके मासि त्रि
रात्रं समुपोषितः स्नातः कदाचित्कालिन्द्यां हरिं मधुवनेर्चयत् ३० महाभिषेकविधिना सर्वो
पस्करसंपदा अभिषिच्याम्बराकल्पैर्गन्धमाल्यार्हणादिभिः ३१ तद्गतान्तरभावेन पूजयामास
केशवं ब्राह्मणांश्च महाभागान्सिद्धार्थानपि भक्तितः ३२ गवां रुक्मविषाणीनां रूप्याङ्घ्रीणां सुवास
सां पयःशीलवयोरूपवत्सोपस्करसंपदां ३३ प्राहिणोत्साधुविप्रेभ्यो गृहेषु न्यर्बुदानि षट् भो
जयित्वा द्विजानग्रे स्वाद्वन्नं गुणवत्तमं ३४ लब्धकामैरनुज्ञातः पारणायोपचक्रमे तस्य तर्ह्यति
थिः साक्षाद्दुर्वासा भगवानभूत् ३५ तमानर्चातिथिं भूयः प्रत्युत्थानासनार्हणैः ययाचेभ्यवहा
राय पादमूलमुपागतः ३६ प्रतिनन्द्य स तां याञ्चां कर्तुमावश्यकं गतः निममज्ज बृहद्ध्यायन्कालि
न्दीसलिले शुभे ३७ मुहूर्तार्द्धावशिष्टायां द्वादश्यां पारणं प्रति चिन्तयामास धर्मज्ञो द्विजैस्तद्धर्मसं
कटे ३८ ब्राह्मणातिक्रमे दोषो द्वादश्यां यदपारणे यत्कृत्वा साधु मे भूयादधर्मो वा न मां स्पृशेत्

रुक्मशृङ्गीणां रूप्यखुराणां पयःशीलादिसम्पन्नानां ३३ न्यर्बुदानि षट् षष्टिकोटीः ३४ तर्हि तदैव दुर्वा
सा अतिथिः साक्षात्सम्पन्नोऽभूत् अनर्चत् अर्चितवान् अभ्यवहाराय भोजनाय आवश्यकं नैयमिकं माध्याह्नि
ककर्म कर्तुं गतः बृहद्ब्रह्म ३७ ३८ धर्मसंकटमेवाह धर्मतः ब्राह्मणातिक्रमे दोषः अधर्मो द्वादश्यपारणे

८

अपराधंविवेदयन्प्रार्थयते अजानतेति अघंदुःखं अपचितिंनिष्कृतिंमद्द्रोहनिष्कृतिंनपश्यामीतिचेत्तत्राह यस्य नाम्निउदितेनारकोपिमुच्यतेतस्यतवकिमसाध्यमितिभावः ६२ ६३ नआशासेनस्पृहयामि ६४ इमंपरं

अजानताऽतेपरमानुभावंकृतंमयाघंभवतःप्रियाणाम् विधेहितस्यापचितिंविधातर्मुच्येतयन्नाम्न्युदिते नारकोपि ६२ श्रीभगवानुवाच अहंभक्तपराधीनोह्यस्वतंत्रइवद्विज साधुभिर्ग्रस्तहृदयोभक्तैर्भ क्तजनप्रियः ६३ नाहमात्मानमाशासेमद्भक्तैःसाधुभिर्विना श्रियंचात्यंतिकींब्रह्मन्येषांगतिरहंप रा ६४ येदारागारपुत्राप्तप्राणान्वित्तमिमंपरं हित्वामांशरणंयाताःकथंतांस्त्यक्तुमुत्सहे ६५ मयिनिर्बद्धहृदयाःसाधवःसमदर्शनाः वशीकुर्वंतिमांभक्त्यासत्स्त्रियःसत्पतिंयथा ६६ मत्सेवयाप्रतीतंचसालोक्यादिचतुष्टयं नेच्छंतिसेवयापूर्णाःकुतोन्यत्कालविप्लुतं ६७ साधवो हृदयंमह्यंसाधूनांहृदयंत्वहं मदन्यत्तेनजानंतिनाहंतेभ्योमनागपि ६८ उपायंकथ यिष्यामितवविप्रशृणुष्वतत् अयंह्यात्माभिचारस्तेयतस्तंयाहिभवान् ६९ साधुषुप्रहितंतेजःप्रहर्तुःकुरुतेशिवं तपोविद्याचविप्राणांनिः श्रेयसकरेउभे तेएवदुर्विनीतस्यकल्पेतेकर्तुरन्यथा ७० ब्रह्मंस्तद्गच्छभद्रंतेनाभागतनयंनृपं क्षमापयमहा भागंततःशांतिर्भविष्यति ७१ इतिश्रीभागवतेन वमस्कंधेश्रीवरीचचरितेनचतुर्थोध्यायः ४

रंचलोकंहित्वा ६५ ६६ प्रतीतंप्राप्तमपि ६७ ६८ आत्मनस्तेएवाभिचारोहिंसायतोऽतस्तमेवयाहि॥ अशिवमनर्थं ६९ तपोविद्यासंपन्नस्यममकृत्यानर्थःसमजनीतिमास्मविस्मयेकाधीरित्याहतपइति

श्रीभावार्थदीपिकायांनवमस्कंधेचतुर्थोध्यायः ४

पंचमे विप्रचक्रं तत्प्रसाद्य प्राणसंकटात् दुर्वासा रक्षितस्तेन तथा तद्गुण ईर्यते सउद्यममितिछेदः सलोपःछ
दःपूरणार्थः २ ज्योतिषां नक्षत्राणां पतिः सोमः त्वं मात्राणि इंद्रियाणि च त्वदंशो वागादयः स्वस्वकार्यकर्तृत्व
सामर्थ्यः ३ सहस्रं अराः यस्य हे सहस्रार स्वस्ति च त्राणं भूयाः इडस्पते हे पृथ्वीपते ४ ब्राह्मणरक्षणं तव युक्त
मित्याह त्वं धर्म इति न च तव वयं स्तुतिः स्तुतिरित्याह पौरुषं पौरुषं यस्य स्वस्य परं तेजः सामर्थ्यं त्वं सर्वात्मभावः सर्वस्तन्म

श्रीशुकः एवं भगवतादिष्टो दुर्वासाश्चक्रतापितः अंबरीषमुपावृत्य तत्पादौ दुःखितोग्रहीत १ तस्य
सोद्यममावीक्ष्य पादस्पर्शविलज्जितः अस्तावीत्तद्धरेरस्त्रं कृपया पीडितो भृशं २ त्वमग्निर्भगवान्सूर्यः त्वं
सोमो ज्योतिषांपतिः त्वमापः त्वं क्षितिर्व्योम वायुर्मात्रेंद्रियाणि च ३ सुदर्शन नमस्तुभ्यं सहस्राराच्यु
तप्रिय सर्वास्त्रघातिन् विप्राय स्वस्ति भूयादिडस्पते ४ त्वं धर्मस्त्वमृतं सत्यं त्वं यज्ञोखिलयज्ञभुक्
त्वं लोकपालः सर्वात्मा त्वं तेजः पौरुषं परं ५ नमः सुनाभाखिलधर्मसेतवे ह्यधर्मशीलासुरधूमके
तवे त्रैलोक्यगोपाय विशुद्धवर्चसे मनोजवायाद्भुतकर्मणे गृणे ६ त्वत्तेजसा धर्ममयेन संहृतं
तमः प्रकाशश्च धृतो महात्मना दुरत्ययस्ते महिमा गिरांपते त्वद्रूपमेतत्सदसत्परावरं ७ ॥

दित्युक्तिरत्र सिद्धं भगवतः शोभनं दर्शनं हि सुदर्शनं तत एवं सर्वं जातं अतस्त्वमेव सर्वात्मेति हे सुनाभ अद्भु
तकर्माणि त्वां कः स्तोतुं समर्थः अतस्त्वां केवलं नमो गृणे इत्यन्वयः अद्भुतकर्मत्वमेवाह अखिलानां
धर्माणां सेतवे मर्यादारूपाय अत एवाधर्मशीलानामसुराणां धूमकेतवे दाहकाय त्रैलोक्यं गोपयती
ति तथा विशुद्धमत्युज्ज्वलं वर्चस्तेजो यस्य तस्मै ६ तदेव प्रपंचयति त्वत्तेजसेति द्वाभ्यां सूर्यादीनां प्रकाश
श्च त्वयैव रूपेण प्रकाश्यत इति त्वद्रूपं ७ ॥ राम

हे अजित भूर्जनेन श्रीहरिणा यदा विसृष्टः त्वं तदा दैत्यदानवानां बलं प्रविष्टः सन् तेषां बाह्वादीन् भिंदन् विराजसे पा
हे नरेकर्जितादैत्याद्दानवाद्यस्मिन् तद्बलं पूर्वं पदेन संधिरार्षः ८ किंच भगवच्चक्रेण त्वं बलानामेव दंडः कार्यसाध
क त्वं रचनीयाः अतो विप्रं त्वत्तेनास्मानं तु गृहाण त्वाह सत्वमिति हे जगत्त्राण सएवं भूतः त्वं बलानामेव प्रहर।

यदा विसृष्टस्त्वमनंजनेन वै बलं प्रविष्टोऽजित दैत्यदानवं । बाहूदरोर्वंघ्रिशिरोधराणि वृश्चन्नजस्रं प्रधने
विराजसे ८ स त्वं जगत्त्राण खलप्रहाणये निरूपितः सर्वसहो गदाभृता । विप्रस्य चास्मत्कुलदैवहेतवे वि
धेहि भद्रं तदनुग्रहो हि नः ९ यद्यस्ति दत्तमिष्टं वा स्वधर्मो वा स्वनुष्ठितः । कुलं नो विप्रदैवं चेद् द्विजो भवतु
विज्वरः १० यदि नो भगवान्प्रीत एकः सर्वगुणाश्रयः । सर्वभूतात्मभावेन द्विजो भवतु विज्वरः ११ श्री
शुकः इति संस्तुवतो राज्ञो विष्णुचक्रं सुदर्शनं । अशाम्यत्सर्वतो विप्रं प्रदहद्राजयाच्ञया १२ स मुक्तो
ऽस्त्राग्नितापेन दुर्वासाः स्वस्तिमांस्ततः । प्रशशंस तमुर्वीशं युंजानः परमाशिषः १३ दुर्वासा उवाच
अहो अनंतदासानां महत्त्वं दृष्टमद्य मे । कृतागसोऽपि यद्राजन्मंगलानि समीहसे १४ दुष्करः को नु
साधूनां दुस्त्यजो वा महात्मनां । यैः संगृहीतो भगवान्सात्वतामृषभो हरिः १५ यन्नामश्रुतिमात्रेण पुमा
न्भवति निर्मलः । तस्य तीर्थपदः किं वा दासानामवशिष्यते १६ राजन्ननुगृहीतोऽहं त्वयातिकरु
णात्मना । मदघं पृष्ठतः कृत्वा प्राणा यन्मेऽभिरक्षिताः १७ राजा तमकृताहारः प्रत्यागमनकांक्षया
चरणावुपसंगृह्य प्रसाद्य समभोजयत् १८ ॥ सएवं प्रसन्नमिदं हेनान्विष्टं भक्तस्य धीमतः मद्यं च वार्मी

गणार्थं निरूपितो नियुक्तः अतोऽस्मत्कुलस्य दैवहेतवे भावपलामायविप्रस्य भद्रं विधेहि तदेव नोऽनुग्रहः सर्वसु
कृतार्पणो वा विप्रत्वात्प्रार्थ्यय नेग्रहस्तीति द्वाभ्यां विप्रो देवदैवतं यस्मिन् ११ राज्ञः स्वयाच्ञया १२ १८ प्रीतो

सीतिश्लोकद्वयं पुनरप्यविशेषोक्तिः राजामारित्श्लोकद्वयं शुकोक्तिः १८ १९ आत्मनिमेधायस्येन तेन आतिथ्येन २० भू
वियं तव स्वोजनः कीर्तयिष्यति २१ २२ तस्यैवं यथातिष्ठायमास गतो मुनिर्यावता कालेन तावत्संवत्सरोऽति

सोऽशित्वाऽन्नमनाहूतमातिथ्यं सार्वकामिकं तृप्तात्मा नृपतिं प्राह भुज्यतामिति सादरं १९ प्रीतोऽस्म्यनु
गृहीतोऽस्मि तव भागवतस्य वै दर्शनस्पर्शनालापैरातिथ्येनात्ममेधसा २० कर्मैतदवदातं ते गाय
न्ति स्वःस्त्रियो मुहुः कीर्तिं परमपुण्यां च कीर्तयिष्यति भूरियं २१ श्रीशुक उवाच एवं संकीर्त्य राजा
नं दुर्वासाः परितोषितः ययौ विहायसामंत्र्य ब्रह्मलोकमहैतुकं २२ संवत्सरोऽत्यगात्तावद्यावता ना
गतो गतः मुनिस्तद्दर्शनाकांक्षो राजाब्भक्षो बभूव ह २३ गतेऽथ दुर्वाससि सोंऽबरीषो द्विजोपयोगा
तिपवित्रमाहरत् ऋषेर्विमोक्षं व्यसनं च वीक्ष्य मेने स्ववीर्यं च परानुभावं २४ एवंविधानेकगुणः
स राजा परात्मनि ब्रह्मणि वासुदेवे क्रियाकलापैः समुवाह भक्तिं ययाविरिंच्यान्निरयांश्चकार २५
श्रीशुक उवाच अथांबरीषस्तनयेषु राज्यं इत्येतत्पुण्यमाख्यानमंबरीषस्य भूपतेः संकीर्तयन्ननुध्यायन्भक्तो भगवतो भवे
त् २७ समानशीलेषु विसृज्य धीरः वनं विवेशात्मनि वासुदेवे मनो दधद्ध्वस्तगुणप्रवाहः २६
इति श्रीभागवते नवमस्कंधे पंचमोऽध्यायः ५ ॥ ॥ श्लो० ३

क्रांत इति २३ द्विजस्योपयोगेन भोजनेनातिपवित्रमाहरत् तदभुंक्त स्ववीर्यं च ये योऽदित्स्तदात्मपरानुभा
वं भगवतः प्रभावं मेने २४ एवंविधा अनेके गुणा यस्य सः आविरिंच्यात् विरिंचिपदसहितान्भोगान्नि
रयप्रायान्पश्यादमर्थः २५ इति श्रीभावार्थे नवमे पंचमः ५

षष्ठारंभेंबरीषस्य वंशमुक्त्वा ततःपरं षष्ठाद्यष्टभिरध्यायैरिक्ष्वाकोर्वंश उच्यते तत्र षष्ठे शशादादिर्यो यातैर्नोनि
रूप्यते प्रसंगात्सौभरेराख्यां मांधातृतनयापतेः तंतवे संतानार्थं अंगिरसा जनिताः एते क्षेत्रे
सुतत्वेन रथीतरगोत्राः संतः अंगिरसा वीर्यात्प्रसूतत्वादांगिरसाश्च पुनरपि रथीतराणां अन्येषां जातानां
प्रवराः मुख्याः स्मृताः यतः क्षत्रोपेताः ब्राह्मणा इत्यर्थः ३ तदेवं मनोर्दशसु पुत्रेषु षट्पृषध्रकविरकत्वात्
वंशप्रवर्तकाः करूषादीनां च समासेन वंशा उक्ताः अनन्यक्रमेणोक्ताः इदानीं मनोर्विंशतिमिक्ष्वाकोर्वंशमाह

श्रीशुकः विरूपः केतुमान् शंभुरंबरीषसुतास्त्रयः विरूपात्पृषदश्वोऽभूत्तत्पुत्रस्तु रथीतरः १ रथीत
रस्याप्रजस्य भार्यायां तंतवेऽर्थितः अंगिरा जनयामास ब्रह्मवर्चस्विनः सुतान् २ एते क्षेत्रप्रसूता
वै पुनस्त्वांगिरसाः स्मृताः रथीतराणां प्रवराः क्षत्रोपेता द्विजातयः ३ क्षुवतस्तु मनोर्जज्ञे इक्ष्वा
कुर्घ्राणतः सुतः तस्य पुत्रशतज्येष्ठा विकुक्षिनिमिदंडकाः ४ तेषां पुरस्तादभवन्नार्यावर्ते नृपा
नृप पंचविंशतिः पश्चाच्च त्रयो मध्ये परेऽन्यतः ५ स एकदाष्टकाश्राद्धे इक्ष्वाकुः सुतमादिशत् मांस
मानीयतां मेध्यं विकुक्षे गच्छ मा चिरं ६ तथेति स वनं गत्वा मृगान् हत्वा क्रियार्हणान् श्रांतो बुभु
क्षितो वीरः शशं चाददपस्मृतिः ७ शेषं निवेदयामास पित्रे तेन च तद्गुरुः चोदितः प्रोक्षणाया
ह दुष्टमेतदकर्मकं ८ ॥

क्षुवतस्तस्मादित्यादिना घ्राणतः नासिकायाः ... क्षुतं कुर्वतो मनोः घ्राणान्नासिकायाः सकाशादिति
पूर्वोक्तेः ... अभिप्रायेणोक्तिरिति ... तेषां ... ४ आर्यावर्तः पुण्यभूमिर्मध्यं विंध्यहिमालययोः न
... पुरस्तात्पूर्वस्यां ... दिशि ... पंचविंशतिर्नृपा अभवन् ... पश्चात्पश्चिमायां पंचविंशतिः मध्ये
त्रयः परेऽन्यतः अपरे ... दक्षिणोत्तरादिषु ५ विकुक्षिरेव शशाद इति ... अष्टका ... माघकृष्णाष्टम्यादि
... ६ क्रियार्हणान् श्राद्धार्हान् ... आददत् अभक्षयत् ७ तद्गुरुर्वसिष्ठः प्रोक्षणाय आदौ प्रोक्षितुं ...

त्यक्तो विधिः सदाचारो येन तं ९ संवादं कृत्वा जापकेन च वसिष्ठेन तत्त्वबोधेन विरक्तो योगी सन् तेन योगेन कलेवरं त्यक्त्वा सः यत् परं तत्त्वं तदवाप १० शासत् पालयन् हरिमीजे ११ दैत्यपुरस्य जयात् पुरंजयः इन्द्रो वाहोऽस्येतीन्द्रवाहः ककुदि स्थितत्वात् ककुत्स्थ इति च शशादसुतस्य त्रीणि नामानि तत्कर्मनिमित्तानि १२ नाम्येव व्याचष्टे वा१

ज्ञात्वा पुत्रस्य तत्कर्म गुरुणाभिहितं नृपः देशान्निःसारयामास सुतं त्यक्तविधिं रुषा ९ स तु विप्रेण संवादं जापकेन समाचरन् त्यक्त्वा कलेवरं योगी स तेनावाप यत्परं १० पितर्युपरतेऽभ्येत्य विकुक्षिः पृथिवीमिमां शासदीजे हरिं यज्ञैः शशाद इति विश्रुतः ११ पुरंजयस्तस्य सुत इंद्रवाह इतीरितः ककुत्स्थ इति चाप्युक्तः शृणु नामानि कर्मभिः १२ कृतांत आसीत्समरो देवानां सह दानवैः पार्ष्णिग्राहो वृतो वीरो देवैर्दैत्यपराजितैः १३ वचनाद्देवदेवस्य विष्णोर्विश्वात्मनः प्रभोः वाहनत्वे वृतस्तस्य बभूवेंद्रो महावृषः १४ स सन्नद्धो धनुर्दिव्यमादाय विशिखाञ्छितान् स्तूयमानः समारुह्य युयुत्सुः ककुदि स्थितः १५ तेजसाप्यायितो विष्णोः पुरुषस्य परात्मनः प्रतीच्यां दिशि दैत्यानां न्यरुणत्त्रिदशैः पुरं १६ तैस्तस्य चाभूत्प्रधनं तुमुलं लोमहर्षणं यमाय भल्लैरनयद्दैत्यानभिययुर्मृधे १७ तस्येषुपाताभिमुखं युगांताग्निमिवोल्बणं विसृज्य दुद्रुवुर्दैत्या हन्यमानाः स्वमालयं १८ ॥

पार्ष्णिग्राह कृतान्त इति सन्नुभिः कृतं विध्वंसं तयतीति तथा पार्ष्णिग्राहः सहायः १३ इन्द्रो यदि मम वाहनं स्यात् तर्हि दैत्यान् हनिष्यामीति तेन वाहनत्वेन वृतः स त्रिदशेन जयान्तरमन्तीकुर्वन् विष्णोर्वचनात्तस्य वाहनत्वाय महान् वृषो बभूवेत्यर्थः १४ ये अभिययुस्तान् यमसदनं प्रापयितुं स देहानेव भल्लैरनयदित्यर्थः तस्येष्वग्र

इतिएतैःकर्मभिःपुरंजयादिनामभिराहूतः आहूतः पातालेआदनस्य अर्थः ९ २० श्रावस्तिः श्रावः तस्य पुत्रः कुवलया
श्वक एव धुंधुमार इति ख्यातः २२ तत्र कारणमाह यइति सुतानामेकविंशत्या सहस्रैर्वृतः सन् हतवान् २२ धुंधुमार इ
ति चेति चकारस्यान्वयः २४ अथ तस्मात्रिभुवनात् कृशाश्वः २५ भार्याशतेन सह अस्य पुत्रार्थमिन्द्रदेवतामिष्टिं
समवर्तयामासुः स्म भावार्थे २६ सदेवाहं राजोतिषड्भिः तर्षितः सन् जलार्थं प्रविष्टः मंत्राभिमंत्रितं जलं पपौ इत्यर्थः

जित्वा परं धनं सर्वं सख्यौ कं वज्रपाणये प्रत्ययच्छत् स राजर्षिरिति नामभिराहृतः १९ पुरंजयस्य पुत्रोऽभूद
गं २ नेनास्तत्सुतः पृथुः विश्वगंधिस्ततश्चंद्रो युवनाश्वस्तु तत्सुतः २० श्रावस्तस्तत्सुतो येन श्रावस्ती निर्ममे पु
री बृहदश्वस्तु श्रावस्तिः ततः कुवलयाश्वकः २१ यः प्रियार्थमुत्तंकस्य धुंधुनामासुरं बली सुताना
मेकविंशत्या सहस्रैरहनद्वृतः २२ धुंधुमार इति ख्यातस्तत्सुतास्ते च जज्वलुः धुंधोर्मुखाग्निना सर्वे
त्रय एवावशेषिताः २३ दृढाश्वः कपिलाश्वश्च भद्राश्व इति भारत दृढाश्वपुत्रो हर्यश्वो निकुंभ
स्तत्सुतः स्मृतः २४ बहुलाश्वो निकुंभस्य कृशाश्वोथास्य सेनजित् युवनाश्वोऽभवत्तस्य सोऽनपत्यो
वनं गतः २५ भार्याशतेन निर्विण्ण ऋषयोस्य कृपालवः इष्टिं स्म वर्तयांचक्रुरैंद्रीं ते सुसमाहिताः
राजा तद्यज्ञसदनं प्रविष्टो निशि तर्षितः दृष्ट्वा शयानान्विप्रांस्तान्पपौ मंत्रजलं स्वयं २७ उत्थितास्ते नि
शम्याथ व्युदकं कलशं विभो पप्रच्छुः कस्य कर्मेदं पीतं पुंसवनं जलं २८ राज्ञा पीतं विदित्वा वै ईश्व
रप्रहितेन ते ईश्वराय नमश्चक्रुरहो दैवबलं बलं २९ ततः काल उपावृत्ते कुक्षिं निर्भिद्य दक्षिणं यु
वनाश्वस्य तनयश्चक्रवर्ती जजान ह ३० कं धास्यति कुमारोयं स्तन्ये रोरूयते भृशं मां धाता वत्स मा रोदी

स्वयं पपौ व्युदकं निरुदकं पुंसवनं पुत्रोत्पत्तिकारणं २८ अहो दैवबलमेव मुख्यं बलं पुरुषबलं न किंचिदिति
वदंते ईश्वराय नमस्कारं चक्रुः २९ ३० अथ कं धास्यति इति पास्यतीति ऊः एवं तैरुक्ते सति तस्याभिप्रायमभि
ज्ञाय इन्द्रो मां धाता हे वत्स मा रोदीरिति ब्रुवन् देशिनीं तर्जनीं मदादित्यर्थः ३१ ॥

श्री० भाग० टी० १३

तस्य पिता युवनाश्वो भिन्नकुक्षिरपि न ममार । किं तु कालांतरे तेनैव तपसा सिद्धिमलभत । मांधातुर्महिमानमाह त्रसद्दस्यु-
रिति षड्भिः । अंगाहे राजन् यस्मान्मांधातुर्दस्यव उद्विग्नाः कंपिताः संतः त्रसंति अत इंद्रोऽपि तस्य त्रसद्दस्युरिति नाम वि-
दधे मांधाता अवनीमेकः शशास स्वयं रावणादयः ३३ अच्युतस्य तेजसा अच्युतनेजसोऽतिवा ३४ आत्मविद्भिस्सं-
यज्ञैर्विष्णुमीजे तमेव विशिनष्टि सर्वदेवमयमिति सार्द्धेन ३५ ३६ प्रतितिष्ठति अस्तं गच्छति प्रसंगात्सौभरेश्चरित-

९·६

न ममार पिता तस्य विप्रदेवप्रसादतः । युवनाश्वोऽथ तत्रैव तपसा सिद्धिमन्वगात् ३१ त्रसद्दस्युरितीन्द्रोऽङ्ग विदधे नाम यस्य वै । यस्मात्त्रसंति ह्युद्विग्ना दस्यवो रावणादयः ३२ यौवनाश्वोऽथ मांधाता चक्रवर्त्यवनीं प्रभुः । सप्तद्वीपवतीमेकः शशासाच्युततेजसा ३३ ईजे च यज्ञं क्रतुभिरात्मविद्भूरिदक्षिणैः । सर्वदेवमयं देवं सर्वात्मकमतीन्द्रियम् ३४ द्रव्यं मंत्रो विधिर्यज्ञो यजमानस्तथर्त्विजः । धर्मो देशश्च कालश्च सर्वमेतद्यदात्मकम् ३५ यावत्सूर्य उदेति स्म यावच्च प्रतितिष्ठति । सर्वं तद्यौवनाश्वस्य मांधातुः क्षेत्रमुच्यते ३६ शशबिंदोर्दुहितरि बिंदुमत्यामधान्नृपः । पुरुकुत्समंबरीषं मुचुकुंदं च योगिनम् ३७ तेषां स्वसारः पंचाशत्सौभरिं वव्रिरे पतिम् । ३८ यमुनांतर्जले मग्नस्तप्यमानः परं तपः । निर्वृतिं मीनराजस्य वीक्ष्य मैथुनधर्मिणः ३९ जातस्पृहो नृपं विप्रः कन्यामेकामयाचत । ४० सोऽप्याह गृह्यतां ब्रह्मन्कामं कन्या स्वयंवरे । स विचिन्त्याप्रियं स्त्रीणां जरठोऽयमसंमतः । वलीपलित एजत्क इत्यहं प्रत्युदाहृतः ४१

माह तेषामिति यावत्सार्द्धाभिः तेषां स्वसारः मांधातृकन्याः ३८ तत्र महतां तपसस्स्रष्टुनो विवाहप्रसंगः कथं वा
जज्ञे तेन वा तत्कन्या वव्रिरे तदाह यमुनांतर्जल इति षड्भिः नृपं मांधातारं सोऽपि मांधाता स्वयंवरे कामं गृह्यतामि-
त्याह स य स्त्रीणामप्रियं मां विचिन्त्य तेनाहं प्रत्युक्तो नात्मानं तथा साधयिष्यामीति षड्भिः अवसि-
तोऽतिश्चितवानिति हृद्यारत्वयः अप्रियत्वे हेतुः तापसत्वादिना वा असंमतत्वे हेतुः वलीभिर्नीत्या वलीभिर्युक्तः पलि-
तश्च एजत्कः कंपमानशिराः ४१ तत्रोऽहं ह :

१३

न येन तस्य प्रपंचः स्वस्त्रीणामपीप्सितं किंपुनः मनुजेन्द्राणां याः स्त्रियः तासामिति ४२ ततः किं कृतं तदाह मुनिविवि
क्ताभ्यां तपोबलाभ्यां नीहारेण पंचाशता मिराजकन्याभिः स एक एव वृतः ४३ ४४ तस्य गार्हस्थ्यं वर्णयति स इति
चतसृभिः स एष बह्वृचे इति मेत्र सामर्थ्ययुक्ताभिः सह रमे रम्य त्र बहणान्वयः कुवेम प्रपारणीयं तुरंत यन्नपः तस्य
श्रियासमस्यास्त्रनर्घ्याः परिच्छदा येषु तेषु गृहेषु तथानानाविधेषूपवनेषु च अमलानेऽभासियेषु तेषु सरस्सु

सायत्रिषु न यत्राभवत् स्वरस्त्रीणामपीप्सितं किंपुनः मनुजेन्द्राणामिति व्यवसितः प्रभुः ४२ मुनिः प्रवेशि
तः [illegible] तत्राकस्मान्तःपुरमृद्धिमत् वृतश्च राजकन्याभिरेकः पंचाशता वरः ४३ तासां कु
लिर मृदुयास्तदर्थे पाश्वसौरुटे समानुरूपो नार्यं वहुनित कृतचेतसा ४४ स बह्वृचस्ताभिरपारणी
यतपः श्रियानर्घ्यपरिच्छदेषु गृहेषु नानोपवनामलांभःसरस्सु सौगंधिककाननेषु ४५ महार्ह
शय्यासनवस्त्रभूषणास्नानानुलेपाभ्यवहारमाल्यकैः स्वलंकृतस्त्रीपुरुषेषु नित्यदा रेमेऽनुगायद्द्वि
जभृंगवंदिषु ४६ यद्गार्हस्थ्यं तु संवीक्ष्य सप्तद्वीपवतीपतिः विस्मितः स्तंभमजहात् सार्वभौमश्रि
यान्वितं ४७ एवं गृहेष्वभिरतो विषयान्विविधैः सुखैः सेवमानो न चातुष्यदाज्यस्तोकैरिवानलः ४८
स कदाचिदुपासीन आत्मापह्नवमात्मनः ददर्श बह्वृचाचार्यो मीनसंगसमुत्थितम् ४९ ॥

च कथंभूतेषु सौगंधिकानां कल्हाराणां च काननानि स्थलो मागेषु ४५ कथंभूतेषु गृहादिषु स्वलंकृताः
स्त्रियाः पुरुषाश्च येषु अनुगायंतो द्विजाश्च पक्षिणः भृंगाश्च वंदिनश्च येषु कथंभूतः महार्हशय्यादिभि
रुपलालितः सन् ४६ स्तंभं गर्वं ४७ आज्यस्तोकैः घृतविंदुभिः ४८ इदानीं तस्या
त्मापह्नवं कर्तुं प्रस्तावमाह स कदाचिदिति मत्स्यभिः आत्मनो मनसो
च्यामिन्द्रियाणीव मुख्यस्य जगदात्मनः ऋतेयो रंतिभारोऽभूत्त्रयस्तस्यात्मजा नृप सुमतिर्ध्रुवो
ऽप्रतिरथः कण्वोऽप्रतिरथात्मजः तस्य मेधातिथिस्तस्मात्प्रस्कण्वाद्या द्विजातयः पुत्रोऽभूत्सुम
तेरेभो दुष्यन्तस्तत्सुतो मतः दुष्यन्तो मृगयां यातः कण्वाश्रमपदं गतः तत्रासीनां स्वप्रभया
मण्डयन्तीं रमामिव विलोक्य सद्यो मुमुहे देवमायामिव स्त्रियम् ८॥
स्यरोद्राश्व स्य पुत्रा जाताः घृताच्यामप्सरसः इति षष्ठी सममस्यर्थे वपावर्तिविट् ह्यातः नृगस्यात्मनः नृगतश्चा
त्मभूतस्य मुख्यस्य प्राणस्येन्द्रियाणीव ५१ दुष्यन्तस्य पौत्रकं नल्यायां भरतः पुत्रोऽभवदिति कथामाह
दुः ष्यन्तो मृगयां यातिमिवदशाभिः तमाश्रमं मंडयंतीं स्त्रियं विलोक्य स्मसुपि प्रमुमोह ८॥

तस्मात्तद्दर्शनेन प्रमुदिता मुनयः सनिवृत्तः परिश्रमो यस्य ॥१॥ पौरवाणां चैनोनयः त्यु मेरमते पुत्रो मुखेन
सः ब्रवीरसमामाणा दैवाद्वेनोभाजन्मतनया वेद्मि ॥२॥ विश्वामित्रस्यात्मजाहमेव कान्ता नातया व सर्वांगाकृत्या
त्रमसक्ता प्रतोरान कस्मैवाहमिमं यथः ॥३॥ किं करवामि मया दिवाकरात्तनदृभिप्रायेणानाद्रुपपन्नामिति ॥४॥ गा
अथ दुष्कृत उवाच
क्वाथेतां वरारोहां भूपैः कतिपयैर्वृतः तद्दर्शनप्रमुदितः सनिवृत्तः परिश्रमः पप्रच्छ कामसंतप्
तः प्रहसन्न मधुरया गिरा ॥ कोनाम कमलपत्राक्षि कस्यासि दयिता मम किं वा विकीर्षितं तव
भवत्यास्मिन्निर्जने वने ॥५॥ अथ नैनं तस्य तनयां वेश्याह नाम मद्यमे तद्वचनः पौरवाणा मध्ये संमतेक्ष
वित ॥६॥ राजोवाच विश्वामित्रात्मजे बाह्ये त्वं कामेन कथा वने वद तद्भगवान्मह्यं को वीर किं
करवाणि ते ॥७॥ आस्यतां त्वं विदालपृच्छतां महर्षिं तपनः भूतानां संततिर्नीवाराद्य्यन्तां यदि रोचते
दुष्कृत उवाच उपपन्नमिदं सुभ्रू नानायाः कपिकान्वये स्वयं हि हृण्णु तेजां कन्यकामदत्प्राप्य ॥७॥
गामित्येतेय एवा धर्मं मुपयेम राजन्तस्ता गान्धर्वविधिना राजा तां देवकालविधानवित् ॥८॥ उपमोवचो
यौवनतर्षि मेदिनीं वीर्यमादधे ॥ स्वामी भूतं स्वपुरं यातः कालेनासूतसामते ॥९॥ कापि कुमारमा
वने यज्ञकर्मा कृता क्रियाः ॥ वृद्धा मृगेन्द्रानरमात्कीडनिस्समवालकः ॥१०॥ तेजनपाकिंको
तमादायप्रमदोत्तमा दूरे रोषा संभ्रूत भर्तुरंतिकमागमत् ॥११॥ यदानन्न गृहे भामा भार्यापुत्रा
वनिदितौ स्वावेतां सर्वभूतानां वे वाणा दृष्ट्या तौ ॥१२॥ माता भस्त्रा पितुः पुत्रो येन जातः सए
वसः भरस्व पुत्रं दुष्कृत ना वमस्थाः शकुन्तला ॥१३॥
धर्मविधिना मित्र जननया पूर्वकेन ॥१४॥ दुरत्ययं विक्रान्ते तव विक्रमयस्य ॥१५॥ भरत्वान नर्म पात्रे तह नमातामा
यायपात्रे पितरे वत्स पुत्रः तच्चहृतः येनेति प्राह्मा देव वचनात्मनाम्मा इति ॥ कृतः भरत सुपाणा प्रमेन भरतन्नाम

सम्मुदिता ॥

॥४॥

श्री
मान
सी
४

किंचरेनाद्यायेनः मेत्रावेणाद्धतनपुत्रोयमत्यामितनंनपतितनत्याचक्रोतिः पुंनाम्नोनकायस्मातिनंजा
यतेस्तुनः तस्मात्पुत्रइतिप्रोक्तः स्वयमेवस्वयंभुवेतिपादोनसमानपित्राः पुत्रेश्रमितिवादेयमत्यायाइमेनि
तोतुः येमृत्समभागाः सक्तापाद्दत्तायायेनः सक्तापिनत्वमेणाविजितमपुत्रनयतिनत्समानेनमत्येःन
नश्रुभार्यापुत्रोस्त्रीकृतनवांनातितेष २१ चक्रवर्तीतिवभूवतिप्रायः तस्यमहिमागीयतेस्माकाश्रुभगी
ताःकृतिनादिवञ्जवस्तुन्माहदारशाम्भुवः प्रपात्रत्वातस्य २२ तत्रलिंगमाहचक्रमिति २३ गमायामनु
लोमपंचापंचाशाताकानिमिरीजे पुरोधायपुरोहितवृत्तायमुनामनुचयमुनाश्चानुलोमं प्रत्याधिकु
समतिमेध्यानस्थानवंवध्यकिञ्चवंनवसुधनप्रकर्षाटटन२४ माचीगुणाप्रकृत्यगुणावृतिदेशाम्निस्थ
रेनोयाः पुत्रोनयतिनरंदवधमत्यान तेचास्यथातस्मिन्भेस्यमनुयमाहपुंडरीकेनला पितर्युप
रतेसावृवंवतीमहायशाः महिमागीयतेतस्यहरतेशम्भुवोभुवि २२ चक्रदिशाहतस्यप
सक्ताशास्यपादयोः इतमहाभिषेकाणांसाभिषिक्तोधिगाद्दिपुः २३ पंचपंचाशतामश्व
गायामनुवातिभिः दौष्यन्तेपुरोधायमुनायामनुगंगः २४ प्रयुक्तमतिमध्यस्थानेवधप्रदद
हुः २४ भरतस्यहिरदोःस्कृतेस्थिःमाचीगुणाचितःसहस्रंबद्धशोयस्मिनत्राहस्ताणांगा

नोभूत यस्मिन्नग्निचयनेदेशोवासहस्रेवाहस्ताणा नेभरतेनभूरिदानेनदत्तागाः बहुशः प्रत्येकबद्धेव
इतिमेनिरेविभज्यनगृह्णः चतरपाति अधिकेस्वयोदेशासहस्रेरेकेबद्धं भवतितथाहिरण्येनपरिह
ताननकृत्स्नानपुत्रांदत्तांस्तुगान मस्मारेभरतोवदातपातबद्धानिसमवेतिशुभस्तानिसमाधिकशान
बद्धानिश्रीणकेनाग्रेश्माकेचतर्दशालक्षेनसगृहीतानिप्रदातकमेणामस्मारेतिपुनानिचतर्दश
तिपवचनतर्दशालक्षणांसमाधिकपातभागोबद्धमित्यनेभवतित्ययुबद्धशाल्यास्माकेनगृहयेन चत
र्दशालक्षाणांसमाधिकशतोपाकः बद्धचरणीनयुसहस्राणांत्रयोदशा २५ ॥

४

देवानामपि मायां वैभवमत्यगात् अभ्यगात् अन्यथा तत्रातः गुरुं बृहस्पतिं आययौ प्राप्तवान् तदंशाभवत्वात् मायया च गुरुरिति पाठे दुःसङ्ग मत्सराणां मायावतां श्रेष्ठः इति विश्वासार्थः २६ मृगान् श्वेतदन्तान् कृष्णान् भद्रमेदं मष्णारे यागे जातानि भेदाः मष्णारे इ त्यस्य श्रुतिपदस्य व्याख्यानं कर्माणीति कश्चित् कर्मविशेषे केचित् मष्णार इति यथा च वदन्ति २८ पुरा देवान् जित्वा ये असुरा रसौकांसि रसातलादिस्थानानि भेजिरे तैः प्राणिभिर्बलिभिः देवस्त्रियो रसातलं नीताः सतीः पुनराहरत् आनिन्ये

त्रयस्त्रिंशच्छतं ह्यश्वान् बद्ध्वा विस्मापयन्नृपान् दौष्मन्तिरत्यगान्मायां देवानां गुरुमाययौ २६ मृगान् शुक्लदतः कृष्णान् हिरण्येन परीवृतान् अदात्कर्मणि मष्णारे नियुतानि चतुर्दश २७ भरतस्य महत्कर्म न पूर्वे नापरे नृपाः नैवापुर्नैव प्राप्स्यन्ति बाहुभ्यां त्रिदिवं यथा २८ किरातहूणान्यवनानान्ध्रकान् कङ्कान् खशान् शकान् अब्रह्मण्यान्नृपांश्चाहन् म्लेच्छान्दिग्विजयेऽखिलान् २९ जित्वा पुरासुरा देवान्ये रसौकांसि भेजिरे देवस्त्रियो रसां नीताः प्राणिभिः पुनराहरत् ३० सर्वकामान्दुदुहतुः प्रजानां तस्य रोदसी समास्त्रिणवसाहस्रीर्दिक्षु चक्रमवर्तयत् ३१ स सम्राड् लोकपालाख्यमैश्वर्यमधिराट् श्रियं चक्रं चास्खलितं प्राणान्मृषेत्युपरराम ह ३२ तस्यासन्नृप वैदर्भ्यः पत्न्यस्तिस्रः सुसम्मताः जघ्नुस्त्यागभयात्पुत्रान्नानुरूपा इतीरिते ३३ ॥

प्राणिभिरश्वमेधादिभिः सह नीता इति वा परिशिष्टमिति पाठे प्राणा यो बलवान् तैर्नीताः सतीर्यद्वा पणायोग्यान् आहरदित्यर्थः ३० त्रिणवसाहस्रीः समाः सप्तविंशतिसहस्रसंवत्सरान् चक्रं सेना आज्ञा वा तस्य वैराग्यमाह सप्रकारमाह मृषेति मृषेति विचार्येति शेषः ३२ नानुरूपा मत्सदृशा न भवन्तीति भर्त्रा ईरिते सति त्यागनिवारणशङ्कया मारणमिति भयात्पुत्रान् जघ्नुः पुनः प्रजानां दर्शनेन वंशादयापातुः संस्थानेन त्यजनेनाप्येवमाशयेन हननम् ३३ ॥

श्री· भाग· टी· ५२

वितथे व्यर्थे सति तदर्थं पुत्रार्थं मरुत्स्तोमेन यागेन यजतः तस्य प्रसन्नाः सन्तो भरद्वाजं नाम तं पुत्रं मरुत उपाददुः सम
र्पयामासुः ३४ ममतां भरद्वाजमातरं प्रकारेद पंचयन्नाह अंतर्वत्न्यामिति त्रिभिः अंतर्वत्न्यां गर्भिण्यां भ्रातृपत्न्यां उतथ्य
स्य भ्रातुः पत्न्यां ममतायां चौर्यात् मैथुनाय कदाचित्प्रवृत्तो बृहस्पतिः तदा द्वितीयगर्भस्यावकाशाभावाद्गर्भस्थेन पूर्व
कृतावस्थितेन वारितः ततः क्रुद्धो बृहस्पतिरंधो भवेति तं गर्भं शप्त्वा बलाद्वीर्यमसिंचत् ततो बृहस्पतेः शापाद्गर्भ
स्था दीर्घतमाः पुत्रो बभूव तेन च तद्वीर्यं पार्ष्णिप्रहारेण योनेर्बहिर्निःसारितं भूमौ पतितं तदेव सद्य एव कुमारोऽभ
वत् ३५ तं च परवीर्यजं भर्तुस्त्यागाद्विशंकितां सतीं त्यक्तुकामां ममतां प्रति सुराः पुत्रनिस्तारार्थं बृहस्पतेर्ममतायाश्च विवा

तस्यैवं वितथे वंशे तदर्थं यजतः सुतं । मरुत्स्तोमेन मरुतो भरद्वाजमुपाददुः ३४ अंतर्वत्न्यां भ्रातृपत्न्यां
मैथुनाय बृहस्पतिः । प्रवृत्तो वारितो गर्भं शप्त्वा वीर्यमवासृजत् ३५ तं त्यक्तुकामां ममतां भर्तुस्त्याग
विशंकितां । नामनिर्वचनं तस्य श्लोकमेनं सुरा जगुः ३६ मूढे भर द्वाजमिमं भर द्वाजं बृहस्पते । या
तौ यदुक्त्वा पितरौ भरद्वाजस्ततस्त्वयं ३७ ॥

दरूपं श्लोकं जगुः किमर्थं जगुः तत्राह तस्य नाम निरुच्यते येन तं तन्नामनिर्वचनं तं च भर्तृत्यागाशंकामपाक
र्तुमित्यर्थः ३६ तं च पुत्रं त्यक्तुकामां ममतां बृहस्पतिराह हे मूढे इमं पुत्रं भर पुषाण इति बृहस्पतिराह
भर्तुर्बिभेमीति चेत्तत्राह द्वाजं एकस्य क्षेत्रे अन्यस्य बीजादिति द्वाभ्यां जातं अतस्त्वया पोष्यः पुत्र इति तस्या
उत्तरश्लोकेऽर्थः एवमुक्ता ममता तं प्रत्याह बृहस्पते त्वमिमं भर यतः द्वाजं युवाभ्यामावाभ्यां मम त्वया च जातं ततो ना
हमेकाकिनी भरामीत्यर्थः यद्यस्मादेवमुक्त्वा पितरौ ममताबृहस्पती विवदमानौ पुत्रं परित्यज्य यातौ ततो हे
तोरयं भारद्वाज इति पाठांतरे यस्य पुत्रस्य यातौ गतः ख्यात पितरौ यातौ तावित्यर्थः ३७ ॥ राम ॥ राम

वितथं व्यभिचारसंभवात् तु मात्मजं वितथं निरर्थकं मत्वा ममता व्यसृजन् न तमात्रपात्ङ्गो लेभे आदितः प्रथमं भर्तृ-
भीया जातमेव वस्तु त्यक्ता मात्मजं मत्वा बृहस्पतेर्जातं मात्रेनार्थः एवं त्यागात् मरुतो बिभृतुः अभिमरुः नेरेवं मरु-
द्भिः प्रापितं भरतस्यान्वयविनाशे सति दत्तः ३८ इति श्रीनवमे विंशोऽध्यायः २० एकविंशे तु दौःषन्तेः संततस्यान्व-
य उच्यते रन्तिदेवाजमीढादेर्यत्र कीर्तिः प्रतन्यते भरतान्वये वितथे सति दत्तत्वाद्वितथसंज्ञो भरद्वाजः सर्वत्रा

६५

चोद्यमाना सुरैरेवं मत्वा वितथमात्मजं व्यसृजन्मरुतोबिभ्रन्दत्तोयं वितथेन्वये ३९ इति श्रीभागवते
नवमस्कंधे विंशोध्यायः २० श्रीशुकः वितथस्य सुतान्मन्योर्बृहत्क्षत्रोजयस्ततः महावीर्योनरोगा-
र्ग्यः संकृतिस्तु नरात्मजः १ गुरुश्च रंतिदेवश्च संकृतेः पांडुनंदन रंतिदेवस्य हि यश इहामुत्र च गीयते २
वियद्वित्तस्य ददतो लब्धं लब्धं बुभुक्षतः ३ निःकिंचनस्य धीरस्य सकुटुंबस्य सीदतः व्यतीयुरष्ट-
चत्वारिंशदहान्यपिबतः किल घृतपायससंयावं तोयं प्रातरुपस्थितं ४ कृच्छ्रप्राप्तकुटुंबस्य
क्षुत्तृड्भ्यां जातवेपथोः अतिथिर्ब्राह्मणः काले भोक्तुकामस्य चागमत् ५ तस्मै संव्यभजत्सोन्नमा-
दृत्य श्रद्धयान्वितः हरिं सर्वत्र संपश्यन्स भुक्त्वा प्रययौ द्विजः ६ अथान्यो भोक्ष्यमाणस्य विभक्तस्य
महीपतेः विभक्तं व्यभजत्तस्मै वृषलाय हरिं स्मरन् ७

स्रातोपि भरतस्य दत्तः पुत्रो जात इति तद्वंशानुक्रमस्य ते वितथस्य सुतो मन्युः तस्मात् बृहत्क्षत्रजयमहावीर्यनर-
गर्गाः पंच पुत्रा बभूवुः १ वियद्वित्तस्य वियतो गगनादिव दैवादुपस्थितमेव वित्तं भोग्यं यस्य यथा-
हा वियद्वित्तस्य यथाम्बु वहति तत् भोग्यं यस्य न देवाह बुभुक्षतोपि सतो २ लब्धं ददतः ३ तस्य पंचयति निःकिंच-
नस्यात्याहिताई: पंचदशाभिः अपिबतो जलपानमप्यकुर्वतः घृतादित्रयाणां द्वंद्वैक्यं तोयं च ४ ५ ६ अ-
थान्यो वृषलोऽतिथिरागमत् विभक्तस्य कुटुंबार्थमवशिष्टं के विभक्तवतः ७ ॥

६५

श्री-
भाव-
दी-
५२

सगणाय श्वयूथसहिताय ८ ९ उच्छेषमुच्छिष्टं एकमेव तर्पयतीति तथा १० ॥ परदुःखासहिष्णुतया सर्वेषां दुः
खं स्वयं भोक्तुमाशास्ते नेति अणिमाद्यष्टसमृद्धियुक्तां गतिमपि वाहं न कामये तर्हि किं कामयसे तदाह अखिल
देहभाजामार्तिं दुःखं तन्मध्येऽन्तर्यामिरूपेणान्तःस्थितः सन्नहं प्रपद्ये प्राप्नुयामित्येवं कामये येन ते दुःखभाक्ता मया हेतुना भू

याते शूद्रे तमन्योऽगादतिथिः श्वभिरावृतः राजन्मे दीयतामन्नं सगणाय बुभुक्षते ८ स आदृत्यावशिष्टं य
द्बहुमानपुरस्कृतं तच्च दत्वा नमश्चक्रे श्वभ्यः श्वपतये विभुः ९ पानीयमात्रमुच्छेषं तच्चैकं परितर्पणं
पास्यतः पुल्कसोऽभ्यागादपो देह्यशुभस्य मे १० तस्य तां करुणां वाचं निशम्य विपुलश्रमां कृपया
भृशसंतप्त इदमाहामृतं वचः ११ न कामयेऽहं गतिमीश्वरात्परामष्टर्द्धियुक्तामपुनर्भवं वा आर्तिं
प्रपद्येऽखिलदेहभाजामन्तःस्थितो येन भवन्त्यदुःखाः १२ क्षुत्तृट्श्रमो गात्रपरिश्रमश्च दैन्यं क्लमः।
शोकविषादमोहाः सर्वे निवृत्ताः कृपणस्य जन्तोर्जिजीविषोर्जीवजलार्पणान्मे १३ एवं प्रभाष्य
पानीयं म्रियमाणः पिपासया पुल्कसायाददाद्धीरो निसर्गकरुणो नृपः १४ तस्य त्रिभुवनाधीशाः
फलदाः फलमिच्छतां आत्मानं दर्शयांचक्रुर्माया विष्णुविनिर्मिताः १५ स वै तेभ्यो नमस्कृत्य निःसं
गो विगतस्पृहः वासुदेवे भगवति भक्त्या चक्रे मनः परं १६

तेन तेषां सर्वेषां दुःखहरणं भवति १२ ननु दुःखं किमि।
ति प्रार्थयसे परदुःखनिवृत्त्यैव मम सर्वदुःखनिवृत्तिरित्याह क्षुदिति कृपणस्य जन्तोर्जीवनहेतोर्जलस्यार्पणा
न्मे सर्वे क्षुडादयो निवृत्ताः १३ इत्येवं प्रभाष्य १४ त्रिभुवनाधीशाः ब्रह्मादयः तदीयधैर्यपरीक्षार्थं प्रथमं माय
या हलादिरूपेण प्रतीताः सन्तः स्वरूपं दर्शयाञ्चक्रुरित्यर्थः १५ परं केवलं वासुदेवे भगवान् नमस्कृतेन तेन तान् किमपि याचितवान् १६

अनपत्यश्च ईश्वराति विक्रमफलं तदानयेत् तस्य प्रलीयत आत्मन्येव लीना बभूव १७ मन्युसुतस्य नरस्य वंशं सुकृतीत
ह्वनेनस्य नरस्य वंशमाह गर्गाद्द्विति महावीर्यस्य वंशमाह दुरितक्षयः तस्य त्रय्यारुणिः कविः पुष्करारुणिश्चेति त्रयः
पुत्राः ब्राह्मणत्वं गताः [illegible] ब्राह्मणा नृपता गतास्ते १९ मनुपुत्राणां मध्ये हस्तिवंशमाह बृहत्क्षत्रस्य तियत
येन हस्तिनापुरं कृतमित्यर्थः अजमीढादयस्त्रयो हस्तिनः पुत्राः २० अजमीढादयो बृहदिषुर्नीमा भवत
पारस्य तनयो नीपः नीपस्य पुत्रशतं २२ स एव कृत्वी सन्नायां शुककन्यायां ब्रह्मदत्तमजनयामास तदङ्ग हरिवंशा

ईश्वरालम्बनं वित्तं कुर्वतोऽनपत्यस्य मायागुणमयी राजन्नभवत्प्रविलीयत १७ तस्य सङ्गानुभावेन रन्तिदेवा
नुवर्तिनः अभवन्योगिनः सर्वे नारायणपरायणाः १८ गर्गाच्छिनिस्ततो गार्ग्यः क्षत्राद्ब्रह्म ह्यवर्तत दुरित
क्षयो महावीर्यात्तस्य त्रय्यारुणिः कविः १९ पुष्करारुणिरित्यत्र ये ब्राह्मणगतिं गताः ५ बृहत्क्षत्रस्य पुत्रो
भूद्धस्ती यद्धस्तिनापुरं अजमीढो द्विमीढश्च पुरुमीढश्च हस्तिनः अजमीढस्य वंश्याः स्युः प्रियमेधा
दयो द्विजाः २० अजमीढाद्बृहदिषुस्तस्य पुत्रो बृहद्धनुः बृहत्कायस्ततस्तस्य पुत्र आसीज्जयद्रथः २१ तत्सु
तो विशदस्तस्य सेनजित्समजायत रुचिराश्वो दृढहनुः काश्यो वत्सश्च तत्सुताः २२ रुचिराश्व
सुतः पारः पृथुसेनस्तदात्मजः पारस्य तनयो नीपस्तस्य पुत्रशतं त्वभूत् २४ स कृत्व्यां शुककन्यायां ब्र
ह्मदत्तमजीजनत् स योगी गवि भार्यायां विष्वक्सेनमधात्सुतं २५ ॥

दिव्य परावरकृत्तोऽस्य शुको नाम महायशाः व्यासाद्वरेण सम्भूतो विभूमाग्निरिवज्वलन् सततं स्पृहित
कन्यायां कीर्त्त्यां जनयिष्यति कृत्वं गौरप्रभं शोभितं व्याभूवि [illegible] कन्या कीर्तिमती षष्ठी योगिनी योगमातृ
[illegible] ब्रह्मदत्तस्य जननी महिषी च [illegible] इति [illegible] निर्गतः तथापि [illegible]
[illegible] ब्रह्मदत्तो योगी
[illegible] २५ ॥

स एव योगतंत्रं चकार बार्हदीषवाः बृहदिषोर्वंश्याः इत्से दीर्घत्वमार्षं २५ सुपार्श्वकृत् सुपार्श्वस्य पिता २८ प्राच्यसा
म्नां षट् संहिता जगौ विभज्याध्यापितवान् २९ अजमीढस्य वंश्याः प्रियमेधादयः केचिद्ब्राह्मणा बभूवुः बृहदिषु

जैगीषव्योपदेशेन योगतंत्रं चकार ह उदक्सेनस्ततस्तस्माद्भल्लाटो बार्हदीषवाः २५ यवीनरो द्विमी
ढस्य कृतिमांस्तत्सुतः स्मृतः नाम्ना सत्यधृतिस्तस्य दृढनेमिः सुपार्श्वकृत् २६ सुपार्श्वात्सुमतिस्त
स्य पुत्रः सन्नतिमांस्ततः कृती हिरण्यनाभाद्यो योगं प्राप्य जगौ स्म षट् २७ संहिताः प्राच्यसाम्नां वै नीपो
ह्युग्रायुधस्ततः तस्य क्षेम्यः सुवीरोऽथ सुवीरस्य रिपुंजयः २८ ततो बहुरथो नाम पुरुमीढोऽप्रजोऽभ
वत् नलिन्यामजमीढस्य नीलः शांतिस्तु तत्सुतः २९ शांतेः सुशांतिस्तत्पुत्रः पुरुजोऽर्कस्ततोऽभवत् भ
र्म्याश्वस्तनयस्तस्य पंचासन्मुद्गलादयः यवीनरो बृहद्विश्वः कांपिल्लः संजयः सुताः ३० भर्म्याश्वः प्राह पु
त्रा मे पंचानां रक्षणाय हि विषयाणामलमिमे इति पंचालसंज्ञिताः मुद्गलस्य संज्ञितं ३१ मिथुनं मुद्गला
द्भार्म्याद्दिवोदासः पुत्रो धनुर्वेदविशारदः शरद्वांस्तत्सुतो यस्मादुर्वशीदर्शनात्किल ३२ शरस्तं
बे पतद्रेतो मिथुनं तदभूच्छुभं तद्दृष्ट्वा कृपयागृह्णाच्छांतनुर्मृगयां चरन् कृपः कुमारः कन्या
च द्रोणपत्न्यभवत्कृपी ३४ इति श्रीभागवते नवमस्कंधे एकविंशतितमोऽध्यायः २१ ॥ ॥

पुमानभूत् अहिल्या कन्यका यस्यां शतानंदस्तु गौतमात् मुद्गलाद्ब्रह्मनिर्वृत्तं गोत्रं ४ मस्त त्रुटि
तस्य सत्यधृतिः ३ मस्त त्रुटि

प्रभृतयः क्षत्रियाश्च निर्वंशा ह्यजमीढेन सोऽवंशं यांतरमाह नलिन्यामिति यावत्समाप्ति २९ मुद्गल एकः यवी
नरादयश्चत्वार इत्येवं पंच ३० भार्म्यात् भर्म्याश्वपुत्रात् मिथुनं यमावभूत् तदेवाह दिवोदास इत्यादि अहल्या चा

म॰ न:५ स्तनय ५

द्वाविंशे तु दिवोदासवंशस्तत्कथ्यवर्णितः ऋक्षवंशे जरासंधपार्थदुर्योधनादयः १ तस्य सोमकस्य पुत्राणां शतं बभूव ते
षां जन्तुर्ज्येष्ठः यवीयान् पृषदः अजमीढस्य वंशान्तरमाह यस्त इति ततः संवरणात् कुरुः ३ ४ तस्य सुतान् उपरिचरो
वसुः ततो वसोर्बृहद्रथस्य सुतत्वं आदि यो षा ५ तानेवाह कुशाग्रेति ६ ततस्ततः सुधन्वान् जज्ञे तस्यापत्यं सममहिन इति

श्रीशुकः मित्रायुश्च दिवोदासाच्च्यवनस्तत्सुतो नृप सुदासः सहदेवोऽथ सोमको जन्तुजन्मकृत् तस्य पु
त्रशतं तेषां यवीयान् पृषतः सुतः द्रुपदो द्रौपदी तस्य धृष्टद्युम्नादयः सुताः २ धृष्टद्युम्नाद्धृष्टकेतुर्भा
र्म्याः पांचालका इमे योऽजमीढसुतो ह्यन्य ऋक्षः संवरणस्ततः ३ तपत्यां सूर्यकन्यायां कुरुक्षेत्रपतिः
कुरुः परीक्षित्सुधनुर्जह्नुर्निषधाश्च कुरोः सुताः सुहोत्रोऽभूत्सुधनुषश्च्यवनोऽथ ततः कृती ४ वसु
स्तस्योपरिचरो बृहद्रथमुखास्ततः कुशाम्बमत्स्यप्रत्यग्रचेदिपाद्याश्च चेदिपाः ५ बृहद्रथात्कु
शाग्रोऽभूदृषभस्तस्य तत्सुतः जज्ञे सत्यहितोऽपत्यं पुष्पवांस्तत्सुतो जहुः अन्यस्यां चापि भार्यायां शक
ले द्वे बृहद्रथात् ६ ये मात्रा बहिरुत्सृष्टे जरया चाभिसंधिते जीव जीवेति क्रीडन्त्या जरासंधोऽभवत्सु
तः ततश्च सहदेवोऽभूत्सोमापिर्यच्छ्रुतश्रवाः परीक्षिदनपत्योऽभूत्सुरथो नाम जाह्नवः ९ ततो विदू
रथस्तस्मात्सार्वभौमस्ततोऽभवत् जयसेनस्तत्तनयो राधिकोऽतोऽयुतोऽन्वभूत् १० ततश्चाक्रोधनस्तस्मा
द्देवातिथिरमुष्य च ऋक्षस्तस्य दिलीपोऽभूत्प्रतीपस्तस्य चात्मजः ११ देवापिः शान्तनुस्तस्य बाह्लीक
इति चात्मजाः पितृराज्यं परित्यज्य देवापिस्तु वनं गतः १२ ॥ ३ ज्ञि ३

सेतुः संवरः जरया रात्रसा ८ यद्यस्मात्सोमापेः श्रुतश्रवाः कुरोः पुत्रः परीक्षिदनपत्यः जाह्नवः जह्नोः पुत्रः ९
अतो राधिकादयुतोऽभूदित्यर्थः ११ तस्य प्रतीपस्य देवापिशान्तनुबाह्लीकाः १२ ॥ राम ॥

प्राक् पूर्वजन्मनि महाभिष इति संज्ञा यस्य सः १२ यदा देवो न ववर्ष तदा शान्तनुस्तत्कारणं ब्राह्मणान्पप्रच्छ १४ ब्राह्म
णास्त्वेवमूचुः दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वज इति स्मृतेः योऽग्रभुक्
भुवमग्रतो भुनक्ति अयं त्वं शान्तनुः परिवेत्तैव भवति अनन्तदोषपरिहाराय राज्यमग्रजाय देहि ततो वृष्टिर्भविष्यत्येव
मेवमुक्तः शान्तनुर्वनं गत्वा ज्येष्ठं छन्दयामास सामस राज्ञः प्रजापालनादिः परो धर्मः अतः त्वं राज्यं स्वीकुर्विति प्रार्थि

अभवच्छन्तनू राजा प्राक् महाभिषसंज्ञितः। यं यं कराभ्यां स्पृशति जीर्णं यौवनमेति सः १२ शान्तिमाप्नोति
चैवाग्र्यां कर्मणा तेन शान्तनुः। समा द्वादश तद्राज्ये न ववर्ष यदा विभुः १४ शान्तनुर्ब्राह्मणैरुक्तः परिवेत्ताय
मग्रभुक्। राज्यं देह्यग्रजायाशु पुरराष्ट्रविवृद्धये १५ एवमुक्तो द्विजैर्ज्येष्ठं छन्दयामास सोऽब्रवीत्। त
न्मन्त्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितो गिरा १६ वेदवादातिवादान्वै तदा देवो ववर्ष ह। देवापिर्योगमास्था
य कलापग्राममाश्रितः। सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति। बाह्लीकात्सोमदत्तोऽभूत् भूरिर्भू
रिश्रवास्ततः १८ शलश्च शान्तनोरासीद्गङ्गायां भीष्म आत्मवान्। सर्वधर्मविदां श्रेष्ठो महाभागवतः
कविः १९ वीरयूथाग्रणीर्येन रामोऽपि युधि तोषितः। शान्तनोर्दासकन्यायां जज्ञे चित्राङ्गदः सुतः २०

तवान् ततः पूर्वमेव तस्य मन्त्रिणा अश्मरावसंज्ञेन देवापेः पाखण्डीकृत्य राज्यावरोधकर्तृ ये प्रहिता विप्रास्तैः पा
खण्डमताश्रयया गिरा वेदाद्विभ्रंशितः सन् वेदवादस्य निन्दा अतिवादवचनानि सोऽब्रवीत् १६ ततस्तस्य पाति
त्येन राज्यानर्हत्वे जाते शन्तनोर्दोषाभावाद्देवो ववर्ष यथेः १७ ततः सोमदत्तात् भूरिः भूरिश्रवाः भूरिः शलश्च इति त्र
यः १९ रामो जामदग्न्यः दाशकन्यायां सत्यवत्यां उपरिचरवसोर्वीर्यात् मत्स्यगर्भोद्भूतायां दासैः कैवर्तैः
पालितायां दासकन्येति प्रसिद्धायां सत्यवत्यां २० ॥

नाम्नातन्नामान्नाम्ना चित्रांगदेन गंधर्वेणायुद्धे हतः यस्यां सत्यवत्यां शंतनुपरिग्रहात्पूर्वमेव २१ वेदगुप्तः वेदान्येन यतो
ऽहं जातः इदं श्रीभागवतं चाध्यगां अधिगतवानस्मि २२ स्वयंवरात् भीष्मेणान्बलाद्दुपानीते मात्रा सत्यवत्या उक्तो
इति निषेधाभावमाह अपतितवयत्न लिप्सुर्देवरात्कुरुमप्युत्पादन् कृतमदीयादिस्मृतिवचनात् २५ दुःशला नाम

विचित्रवीर्यश्चावरजो नाम्ना चित्रांगदो हतः यस्यां पराशरात्साक्षादवतीर्णो हरेः कला। २१ वेदगुप्तो
मुनिः कृष्णो यतो ऽहमिदमध्यगां हित्वा स्वशिष्यान्पैलादीन्भगवान्बादरायणः २२ मह्यं पुत्राय शांता
य परं गुह्यमिदं जगौ विचित्रवीर्यो ऽथोवाह काशीराजसुते बलात् २३ स्वयंवरादुपानीते अंबिकां
बालिके उभे तयोरासक्तहृदयो गृहीतो यक्ष्मणा मृतः २४ क्षेत्रे ऽप्रजस्य वै भ्रातुर्मात्रोक्तो बादरायणः
धृतराष्ट्रं च पांडुं च विदुरं चाप्यजीजनत् २५ गांधार्यां धृतराष्ट्रस्य जज्ञे पुत्रशतं नृप तत्र दुर्योधनो ज्येष्ठो
दुःशला चापि कन्यका २६ शापान्मैथुनरुद्धस्य पांडोः कुंत्यां महारथाः जाता धर्मानिलेंद्रेभ्यो युधि
ष्ठिरमुखास्त्रयः २७ नकुलः सहदेवश्च माद्र्यां नासत्यदस्रयोः द्रौपद्यां पंच पंचभ्यः पुत्रास्ते पितरो ऽभ
वन् २८ युधिष्ठिरात्प्रतिविंध्यः श्रुतसेनो वृकोदरात् अर्जुनाच्छ्रुतकीर्तिस्तु शतानीकस्तु नाकुलिः
सहदेवसुतो राजन् श्रुतकर्मा तथापरे युधिष्ठिरात्तु पौरव्यां देवको ऽथ घटोत्कचः ३० भीमसेनाद्धि
डिंबायां काल्यां सर्वगतस्ततः सहदेवात्सुहोत्रं तु विजयासूत पार्वती ३१ करेणुमत्यां नकुलो नर
मित्रं तथार्जुनः इरावंतमुलूप्यां वै सुतायां बभ्रुवाहनं मणिपुरपतेः सो ऽपि तत्पुत्रः पुत्रिकासुतः ३२
तव तातः सुभद्रायामभिमन्युरजायत सर्वातिरथजिद्वीर उत्तरायां ततो भवान् ३३ ॥ ॥

च कन्यका जज्ञे २६ पुत्राणि मैथुने रुद्धस्य प्रतिबद्धस्य २७ नासत्यदस्राभ्यामश्विभ्यां पंचभ्यो ऽभवन् वा
भवन् तथापरे च भार्यांतरेषु ३० काली चान्या भीमस्य भार्या तस्यां ततो भीमात्सर्वगतो नाम पुत्रो ऽभवदित्यर्थः
उलूपी नागकन्या यो मणिपूरपतेः सुतायां पुत्रिकाधर्मेण दत्तायां बभ्रुवाहनमसूत तत्र तेन स पुत्रः सन्नपि सः पुत्रि

तुरसंज्ञं पुरोहितं कृत्वा ३७ भविष्यानाह तस्य पुत्र इति यावत्समाप्ति याज्ञवल्क्यात्क्रियाज्ञानं परं चात्मज्ञानं शौन
कादाप्स्यति अस्त्रज्ञानं कृपाचार्यादिति द्रष्टव्यं याज्ञवल्क्यात्त्रयीमधीत्य कृपादस्त्राण्यवाप्येति वक्ष्यमाणोक्तेः कृ

शि·कं·१ ६

परिक्षीणेषु कुरुषु द्रौणेर्ब्रह्मास्त्रतेजसा त्वं च कृष्णानुभावेन सजीवो मोचितोऽन्तकात् ३४ तवेमे त
नयाः तात जनमेजयपूर्वकाः श्रुतसेनो भीमसेन उग्रसेनश्च वीर्यवान् ३५ जनमेजयस्त्वां विदित्वा त
क्षकान्निधनं गतं सर्पान्वै सर्पयागाग्नौ स होष्यति रुषान्वितः ३६ कालषेयं पुरोधाय तुरं तुरग
मेधषाट् समन्तात्पृथिवीं सर्वां जित्वा यक्ष्यति चाध्वरैः ३७ तस्य पुत्रः शतानीको याज्ञवल्क्यात्त्रयीं पठ
न् अस्त्रज्ञानं क्रियाज्ञानं शौनकात्परमेष्यति ३८ सहस्रानीकस्तत्पुत्रः ततश्चैवाश्वमेधजः अ
सीमकृष्णस्तस्यापि नेमिचक्रस्तु तत्सुतः ३९ गजाह्वये हृते नद्या कौशाम्ब्यां साधु वत्स्यति उक्त
स्ततः चित्ररथः तस्मात्कविरथः सुतः ४० तस्माच्च वृष्टिमांस्तस्य सुषेणोऽथ महीप
तिः सुनीथस्तस्य भविता नृचक्षुर्यत्सुखीनलः ४१ परिप्लवः सुतस्त
स्मान्मेधावी सुनयात्मजः नृपंजयस्ततो दूर्वस्तिमिस्तस्माज्ज
निष्यति तिमेर्बृहद्रथस्तस्माच्छतानीकः सुदासजः ४२

हि·४

चित्र अस्त्रज्ञानं कृपाचार्यादित्यवधार्यः ४० यस्मात्सुखीनलः पुत्रः ४१ तस्मात्परिप्लव इत्येवान्व
यः तस्मान्मेधावीत्यर्थः तस्मात्सुदासः ततः शतानीक इत्यर्थः ४२ ॥ रामाय नमः ॥

बृहद्रथस्य वंश्यः तस्य सहदेवः तस्य मार्जारिः यस्मान्मार्जारेः श्रुतश्रवाः ४५ सहस्रसंवत्सरमेते भाव्या भूपा-
लाः ततः परं भाव्यानवदत् द्वादशस्कन्धे वक्ष्यति ४९ श्रीभावार्थे नवमे द्वाविंशः २२ त्रयोविंशेऽनोर्द्रुह्योस्तुर्वशोश्चा-

शतानीकाद्दुर्दमनस्तस्यापत्यं महीनरः दंडपाणिर्निमिस्तस्मात्क्षेमको भविता नृप ४३ ब्रह्मक्षत्रस्य
वै योनिर्वंशो देवर्षिसत्कृतः क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ४४ अथ मागधराजानो भावि-
नो ये वदामि ते भविता सहदेवस्य मार्जारिर्यच्छ्रुतश्रवाः ४५ ततोऽयुतायुस्तस्यापि निरमित्रोऽथ तत्सु-
तः सुनक्षत्रः सुनक्षत्राद्बृहत्सेनोऽथ कर्मजित् ४६ ततः सुतंजयाद्विप्रः शुचिस्तस्य
भविष्यति क्षेमोऽथ सुव्रतस्तस्माद्धर्मसूत्रः समस्ततः ४७ द्युमत्सेनोऽथ सुमतिः सुबलो ज-
निता ततः सुनीथः सत्यजिदथ विश्वजिद्यद्रिपुंजयः ४८ बार्हद्रथाश्च भूपाला भाव्याः सहस्रव-
त्सरं ४९ इति श्रीभागवते नवमस्कन्धे द्वाविंशोऽध्यायः २२ श्रीशुक उवाच अनोः सभानरश्चक्षुः परोक्ष-
श्च त्रयः सुताः सभानरात्कालनरः सृंजयस्तत्सुतस्ततः १ जनमेजयस्तस्य पुत्रो महाशालो महामना-
नाः उशीनरस्तितिक्षुश्च महामनस आत्मजौ २ शिबिर्वनः शमिर्दक्षश्चत्वारोशीनरात्मजाः वृषा-
दर्भः सुवीरश्च मद्रः कैकय आत्मजाः ३ शिबेश्चत्वार एवासंस्तितिक्षोश्च रुशद्रथः ततो होमोऽथ
सुतपा बलिः सुतपसोऽभवत् ४ अंगवंगकलिंगाद्याः सुह्मपुंड्रौड्रसंज्ञिताः जज्ञिरे दीर्घतमसो बले-
क्षेत्रे महीक्षितः ५ चक्रुः स्वनाम्ना विषयान्षडिमान्प्राच्यकांश्च ते खनपानोऽङ्गतो जज्ञे तस्माद्दिविरथ-
स्ततः ६ सुतो धर्मरथो यस्य जज्ञे चित्ररथोऽप्रजाः रोमपाद इति ख्यातस्तस्मै दशरथः सखा शान्तां स्व-

न्वयः कस्मात् यदोस्तु वंशो न उक्तो यावज्जामघसंभवः तदेवं ययातेः पुत्राणां पंचमस्य पुरोर्वंशोऽनुक्रान्तः इदा-
नीं चतुर्णां वंशमनुक्रामति अनोरिति जगतीपतेर्दिवेन १ तस्य जनमेजयस्य महामनाः २ चत्वार उशीनरस्य

सतु दुष्मंतः स्ववंशं पौरववंशं १९ प्रथमस्य सहस्रजित आत्मजः २० कुंतेः सोहंजिः सोहंजेर्महिष्मान्महिष्मतो भद्रसेनकः

मरुत्वते:२ कर्मा३

देवेऽवर्षति यं रामा आनिन्युर्हरिणीसुतं नाट्यसंगीतवादित्रैर्विभ्रमालिंगनार्हणैः ८ स तु राज्ञोनपत्यस्य निरूप्येष्टिं मरुत्वतः प्रजामदाद्दशरथो येन लेभे प्रजाः प्रजाः ९ चतुरंगो रोमपादात्पृथुलाक्षस्तु तत्सुतः बृहद्रथो बृहत्कर्मा बृहद्भानुश्च तत्सुताः १० आद्याद्बृहन्मनास्तस्माज्जयद्रथ उदाहृतः विजयस्तस्य संभूत्यां ततो धृतिरजायत ११ ततो धृतव्रतस्तस्य सत्कर्माधिरथस्ततः योऽसौ गंगातटे क्रीडन्मंजूषांतर्गतं शिशुं १२ कुंत्यापविद्धं कानीनमनपत्योऽकरोत्सुतं वृषसेनः सुतस्तस्य कर्णस्य जगतीपतेः १३ द्रुह्योश्च तनयो बभ्रुः सेतुस्तस्यात्मजस्ततः आरब्धस्तस्य गांधारस्तस्य धर्मस्ततो धृतः १४ धृतस्य दुर्मदस्तस्मात्प्रचेताः प्राचेतसः शतं म्लेच्छाधिपतयोऽभूवन्नुदीचीं दिशमाश्रिताः १५ तुर्वसोश्च सुतो वह्निर्वह्नेर्भर्गोऽथ भानुमान् त्रिभानुस्तत्सुतोऽपुत्रः पुत्रं पौरवमन्वभूत् दुष्मंतः स पुनर्भेजे स्ववंशं राज्यकामुकः १७ ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशं नरर्षभ वर्णयामि महापुण्यं सर्वपापहरं नृणां १८ यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते यत्रावतीर्णो भगवान्परमात्मा नराकृतिः १९ यदोः सहस्रजित्क्रोष्टा नलो रिपुरिति श्रुताः चत्वारः सूनवस्तत्र शतजित्प्रथमात्मजः २० महाहयो रेणुहयो हैहयश्चेति तत्सुताः धर्मस्तु हैहयसुतो नेत्रः कुंतेः पिता ततः २१ सोहंजिरभवत्कुंतेर्महिष्मान् भद्रसेनकः दुर्मदो भद्रसेनस्य धनकः कृतवीर्यसूः कृताग्निः कृतवर्मा च कृतौजा धनकात्मजाः २२ ॥

पिकरंधमउ धीःमरुतस्तत्सु १६ तुरि

सत्कर्मा

सुद्र

तस्य दुर्मदो धनकश्चेति द्वौ पुत्रौ कृतवीर्यस्य जनकः कृतवीर्यादयश्चत्वारो धनकस्यात्मजा इत्यर्थः २२ राम ॥

अनष्टस्य वित्तस्य विनाशं विना स्मरणं यस्य सः अव्यक्तषड् इंद्रियविषयं बुभुजे २५ २६ और्वस्य तेजः सगरेणोपसंहृतमित्यर्थः तेषां तालजंघपुत्राणां ज्येष्ठो वीतिहोत्रः मधोः पुत्रशतं वृष्णिज्येष्ठं यस्मिन् यतो मधोर्वृष्णेश्च हेतोः इदं कुलं च तुर्दश महारत्नानि तत्तज्जातिश्रेष्ठानि यस्य सः तानि च मार्कंडेयपुराणे वर्णितानि गजवाजिरथस्त्रीषुनिधिमा

अर्जुनः कृतवीर्यस्य स सप्तद्वीपेश्वरोभवत् दत्तात्रेयाद्धरेरंशात्प्राप्तयोगमहागुणः २३ न नूनं कार्तवीर्यस्य गतिं यास्यंति पार्थिवाः यज्ञदानतपोयोगश्रुतवीर्यजयादिभिः २४ पंचाशीतिसहस्राणि ह्यव्याहतबलः समाः अनष्टवित्तस्मरणो बुभुजेऽव्यक्तषड्वसु २५ तस्य पुत्रसहस्रेषु पंचैवोर्वरिता मृधे जयध्वजः शूरसेनो वृषभो मधुरूर्जितः २६ जयध्वजात्तालजंघस्तस्य पुत्रशतं त्वभूत् क्षत्रं यत्तालजंघाख्यमौर्वतेजोपसंहृतं २७ तेषां ज्येष्ठो वीतिहोत्रो वृष्णिः पुत्रो मधोः स्मृतः तस्य पुत्रशतं त्वासीद्वृष्णिज्येष्ठं यतः कुलं २८ माधवा वृष्णयो राजन् यादवाश्चेति संज्ञिताः यदुपुत्रस्य च क्रोष्टोः पुत्रो वृजिनवांस्ततः २९ स्वाहितोतो रुशेकुर्वै तस्य चित्ररथस्ततः शशबिंदुर्महायोगी महाभोजो महानभूत् ३० चतुर्दशमहारत्नश्चक्रवर्त्यपराजितः तस्य पत्नीसहस्राणां दशानां सुमहायशाः दशलक्षसहस्राणि पुत्राणां तास्वजीजनत् ३१ तेषां तु षट्प्रधानानां पृथुश्रवस आत्मजः धर्मो नामोशना तस्य हयमेधशतस्य याट् ३२ तत्सुतो रुचकस्तस्य पंचासन्नात्मजाः शृणु पुरुजित्रुक्मरुक्मेषु पृथुज्यामघसंज्ञिताः ३३ ॥

ल्यांबरद्रुमाः शक्तिपाशमणिछत्रविमानानि चतुर्दशेति दशानां पत्नीसहस्राणां आर्यावृत्तस्य प्रत्येकं लक्षं लक्षमित्येवं तासु पुत्राणां दशलक्षसहस्राणि जनयामास पृथुश्रवाः पृथुकीर्तिः पृथुश्रवास्त्वादयः षट् प्रधाना श्रेष्ठा येषां तेषां मध्ये ३२ पंच आत्मजा आसन् तान् शृणु तानेवाह पुरुजिदिति ३३ ॥ ॥

ोदर्तुनौ रा
ष्यैवान्यं
स्त३

भार्याभयादेवैकभार्यस्य शैब्यापतेर्ज्यामघस्यापुत्रस्य तद्द्वयमेवपुत्रस्नुषाद्वयमभवदिति दर्शयन्नाह ज्यामघस्त्विति यदिमे सपत्नी स्यात्तर्हि स्नुषेयं पुत्रेणापि न त्वेतदस्तीत्याह अहमसपत्नी चेति ३६ अभिप्रायमाकलय्याह जनयि ष्यसीति भार्याभयशङ्कयमानस्य तत्र सर्वोत्तरस्य तत्त्वप्रामाण्ये कदमालोक्यान्तर्कोपितास्तेन वक्तुकालं आवाधि ताविश्वेदेवाः पितरश्चानुमोदन्त ३७ ततश्च देवताप्रसादेन जनयिष्यसीति वचनस्य हृत्तत्त्वेन च निर्दि

ज्यामघस्त्वप्रजोऽप्यन्यां भार्यां शैब्यापतिर्भयात् नाविन्दच्छत्रुभवनाद्भोज्यां कन्यामहारषीत् ३५ रथ स्थां तां निरीक्ष्याह शैब्या पतिममर्षिता केयं कुहक मत्स्थानं रथमारोपितेति वै ३६ स्नुषा तवेत्यभिहिते स्मयन्ती पतिमब्रवीत् अहं वन्ध्यासपत्नी च स्नुषा मे युज्यते कथं ३७ जनयिष्यसि यं राज्ञि तस्येयमुपयुज्यते अन्वमोदन्त तद्विश्वेदेवाः पितर एव च ३८ शैब्या गर्भमधात्काले कु मारं सुषुवे शुभं स विदर्भ इति प्रोक्त उपयेमे स्नुषां सतीं ३९ इति श्रीभागवते नवमस्कन्धे यादु वंशानुकथने नाम त्रयोविंशोऽध्यायः २३ श्रीशुकः तस्यां विदर्भोऽजनयत्पुत्रौ नाम्ना कुशक्रथौ तृतीयं रोमपादं च विदर्भकुलनन्दनं १ रोमपादसुतो बभ्रुर्बभ्रोः कृतिरजायत उशिकस्तत्सुत स्तस्माच्चेदिश्चैद्यादयो नृपाः २ ॥

तत्र कालेऽपि शैब्या गर्भमधात् तस्य च महिमा पराशरादिभिरुक्तः यथोक्तं भार्यावश्यास्तु ये केचिद्भवि ष्यन्त्यथवा मृताः तेषां तु ज्यामघः श्रेष्ठः शैब्यापतिरभून्नृप इति ३८ इति श्रीभावार्थे नवमे त्रयोविंशः २३ च तुर्विंशे विदर्भस्य पुत्रत्रयसमुद्भवाः वंशानाम् उक्ता ज्योत्स्नानमहत्त्वोद्भवावधि १ चैद्यादयः दमघोषादयः

ततो दशरथाच्छकुनिः पुत्रास्तां नवदेवमादिविशेषोद्भवाः ४ ततः कुरुवंशादंशुः ५ अंशोः पुत्रः पुरुहोत्रः
महाभोजश्च मैवेसत्वताविषये भाष्ये तत्रत्ततुय देशेन येपंचषष्ट्यादिसंख्याः पुरुषाः ते अमृतत्वं मोक्षं प्राप्ताः

कृष्टस्याकृतिपुत्रोऽभूद्भृत्तिस्तस्याथ निर्वृतिः ततो दशार्हो नाम्नाभूत्तस्य व्योमः सुतस्ततः ३ जीमूतो वि
कृतिस्तस्य यस्य भीमरथः सुतः ततो नवरथः पुत्रो जातो दशरथस्ततः ४ करंभिः शकुनेः पुत्रो देव
रातस्तदात्मजः देवक्षत्रस्ततस्तस्य मधुः कुरुवशादनुः ५ पुरुहोत्रस्त्वनोः पुत्रस्तस्यायुः सात्वतस्त
तः भजमानो भजिर्दिव्यो वृष्णिर्देवावृधोऽन्धकः ६ सात्वतस्य सुताः सप्त महाभोजश्च मारिष भज
मानस्य निम्लोचिः किंकिणो धृष्टिरेव च ७ एकस्यामात्मजाः पत्न्यामन्यस्यां च त्रयः सुताः शतजिच्च
सहस्रजिदयुतजिदिति प्रभो ८ बभ्रुर्देवावृधसुतस्तयोः श्लोकौ पठंत्यमू यथैव शृणुमो दूरा
त्संपश्यामस्तथांतिकात् ९ बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः पुरुषाः पंचषष्टिश्च षट्सहस्राणि चाष्ट च
ह्यमृतत्वमनुप्राप्ता बभ्रोर्देवावृधादपि १० महाभोजोऽतिधर्मात्मा भोजा आसंस्तदन्वये
वृष्णेः सुमित्रः पुत्रोऽभूद्युधाजिच्च परंतप ११ शिनिस्तस्यानमित्रश्च निघ्नोऽभूदनमित्रतः स
त्राजितः प्रसेनश्च निघ्नस्याथासतुः सुतौ १२ अनमित्रसुतो योऽन्यः शिनिस्तस्याथ सत्यकः युयु
धानः सात्यकिर्वै जयस्तस्य कुणिस्ततः १३ युगंधरोऽनमित्रस्य वृष्णिः पुत्रोऽपरस्ततः १४ श्वफल्कः
चित्ररथश्च गांदिन्यां तु श्वफल्कतः अक्रूरप्रमुखा आसन्पुत्रा द्वादश विश्रुताः १५ ॥

तस्य युधाजितः शिनिरनमित्रश्च सात्यकिः सत्यकस्य पुत्रो युयुधानः तस्य जयः तस्य कुणिः ततः कुणे
र्युगंधरः अनमित्रस्यैवापरः वृष्णिर्नाम पुत्रः १४ अक्रूरः प्रमुखो येषां इति तद्गुणसंविज्ञानो बहुव्रीहिः

कुणेर्युगंधरपुत्रो स्य नयाद्वा ... ता २ त्रुटि

अतोऽक्रूरातिरिक्तान् द्वादश दर्शयति आसंग इति १६ १७ पृथुरेकः विदूरथाद्याश्चान्येऽपि बहवः विष्णुर्यामाद्याः इति पाठे आद्यशब्देन विदूरथात् पूर्वजस्तस्य सुतो विदूरथादासीदिति वक्ष्यमाणानिर्देशोपपत्तिः १८ कुकुराद

आसंगः सारमेयश्च मृदुरो मृदुविद्गिरिः धर्मवृद्धः सुकर्मा च क्षेत्रोपेक्षोऽरिमर्दनः १६ शत्रुघ्नो गंधमादश्च प्रतिबाहुश्च द्वादश तेषां स्वसा सुचाराख्या द्वावक्रूरसुतावपि १७ देववानुपदेवश्च तथा चित्ररथात्मजाः पृथुर्विदूरथाद्याश्च बहवो वृष्णिनन्दनाः १८ कुकुरो भजमानश्च शुचिः कंबलबर्हिषः कुकुरस्य सुतो वह्निर्विलोमा तनयस्ततः १९ कपोतरोमा तस्यानुः सखा यस्य च तुंबुरुः अंधकाद्दुंदुभिस्तस्माद् अविद्योतः पुनर्वसुः २० तस्याहुकश्चाहुकी च कन्या चैवाहुकात्मजौ देवकश्चोग्रसेनश्च चत्वारो देवकात्मजाः २१ देववानुपदेवश्च सुदेवो देववर्धनः तेषां स्वसारः सप्तासन् धृतदेवादयो नृप २२ शांतिदेवोपदेवा च श्रीदेवा देवरक्षिता सहदेवा देवकी च वसुदेव उवाह ताः २३ कंसः सुनामा न्यग्रोधः कंकः शंकुः सुहूस्तथा राष्ट्रपालोऽथ धृष्टिश्च तुष्टिमानौग्रसेनयः २४ कंसा कंसवती कंका शूरभू राष्ट्रपालिका उग्रसेनदुहितरो वसुदेवानुजस्त्रियः २५

यद्यप्यत्रांधकस्य सुता इति ज्ञेयं तथा च पराशरः कुकुरभजमानशुचिकंबलबर्हिषसंज्ञाश्चांधकस्य पुत्रा इति १९ अतोऽन्धकस्यान्धकाद्दुंदुभिरित्यपि तद्वचनादेव ज्ञेयं २० धृतदेवाद्या आद्यग्रहणात् शांतिदेवादीनां सप्तानां औग्रसेनयः उग्रसेनस्य २४ वसुदेवस्यानुजा देवभागादयः तेषां स्त्रियो भार्याः २५ ॥

द्वितीयस्य भजमानस्य वंशमाह भजमानाद्विदूरथः पुत्रो भवत् विदूरथाच्च शूर इति पराशरादि वचनात् शूरा
पृथग्विदूरथाद्यास्तिस्रस्विर्वक्ति विदूरथात्मजाद्विदूरथात् २६ देवमीढ्यमयः शूरो नाम पुत्रः तस्य देवमीढोऽह्र
दीकस्यैव सुतः यथाह पराशरः तस्यापि कृतवर्मा शतधनुर्देवमीढषाद्याः पुत्रा बभूवुः देवमीढस्य शूरस्यापि मा
रिषा नाम पत्न्यभवत् २७ तस्यां चासौ दश पुत्रान् अजनयत् वसुदेवप्रभृतीनिति। आनकाश्चैव दुः हरेः प्रादु

शूरो विदूरथादासीद्भजमानः सुतस्ततः शिनिस्तस्मात्स्वयंभोजो हृदीकस्तत्सुतो मतः २६ देवबा
हुः शतधनुः कृतवर्मेति तत्सुताः देवमीढस्य शूरस्य मारिषा नाम पत्न्यभूत् २७ तस्यां स जनयामा
स दश पुत्रानकल्मषान् वसुदेवं देवभागं देवश्रवसमानकं २८ सृञ्जयं श्यामकं कंकं शमीकं व
त्सकं वृकं देवदुन्दुभयो नेदुरानका यस्य जन्मनि २९ पृथा च श्रुतदेवा च श्रुतकीर्तिः श्रुतश्रवाः
राजाधिदेवी चैतेषां भगिन्यः पंच कन्यकाः ३० कुन्तेः सख्युः पिता शूरो ह्यपुत्रस्य पृथामदात् ३१
साप दुर्वाससो विद्यां देवहूतीं प्रतोषितात् तस्या वीर्यपरीक्षार्थमाजुहाव रविं शुचिः ३२ तदै
वोपगतं देवं वीक्ष्य विस्मितमानसा प्रत्ययार्थं प्रयुक्ता मे याहि देव क्षमस्व मे ३३ अमोघं दर्शनं
देवि आधत्से त्वयि चात्मजं योनिर्यथा न दुष्येत कर्ताहं ते सुमध्यमे ३४ इति तस्यां स आधाय
गर्भं सूर्यो दिवं गतः सद्यः कुमारः संजज्ञे द्वितीय इव भास्करः ३५ ॥

वसुदेवं हरेः स्थानं वदन्त्यानकदुन्दु भिं ॥ पं. ५ त्रुटि

र्भावस्थानत्वात् ३० पृथायाः कन्यकावस्थायां कर्णोत्पत्तिप्रकारमाह कुन्तेरिति पंचभिः कदाचिद्दुह
माया तां दुर्वाससं पृथा परिचर्यादिना तोषयामास ततः वशात्तस्मा देवहूतिं देवाह्वानहेतुं विद्यामवाप तत
दाह साऽपि तदा देवमुपागतं वीक्ष्य साऽऽह प्रत्ययार्थं परीक्षार्थं मया विद्या प्रयुक्ता न तु त्वया किंचित्कार्यमिति
भिसंधिना अतो याहि क्षमस्व मन्त्रोच्चारविरुवाच ३३ अमोघं देवदर्शनमिति कन्याहं इति चेत् आह यथा योनिर्न दु

श्री०
भाग०
टी०
५५

आवंत्यौ विंदानुविंदौ ३९ तदेवं वसुदेवस्य भगिनीनां पतीन्पुत्रांश्चेत्युक्त्वा ज्ञातीनां नवानां पत्नीपुत्रांश्चाह देवभाग

स्ताप

मेसायजन्नदीतोयेकज्ञालोकसविश्यती प्रपितामहसमुद्वाहयांउर्वैनमविक्रमः ३६ ऋतदेवान्तु कारुषोदन्तवक्रः समगृहीत यस्यामभूद्दन्तवक्र ऋषिःसमादितः सुतः ३७ कैकेय्यां धृष्टकेतस्तु श्रुतकीर्तिमविदत संतर्दनादयस्तस्यां पंचासन्कैकयाः सुताः ३८ राजाधिदेव्यामावंत्यौ जयसेनोऽजनिष्ट ह दमघोषश्चेदिराजः श्रुतश्रवसमग्रहीत् शिशुपालः सुतस्तस्याः कथितस्तस्य संभवः देवभागस्य कंसायां चित्रकेतुबृहद्बलौ ४० कंसवत्यां देवश्रवसः सुवीर इषुमांस्तथा कंकायां सामकाः जातः सत्यजित्पुरुजित्तथा ४१ सृंजयो राष्ट्रपाल्यां च वृषदुर्मर्षणादिकान् हरिकेशहिरण्याक्षौ शूरभूम्यां च श्यामकः ४२ मिश्रकेश्यामप्सरसि वृकादीन्वत्सकस्तथा तक्षपुष्करशालादीन्दुर्वाक्ष्यां वृक आदधे ४३ सुमित्रार्जुनपालादीन्समीकात्तु सुदामिनी कंकश्च कर्णिकायां वै ऋतधामा जयावपि ४४ पौरवी रोहिणी भद्रा मदिरा रोचना इला देवकीप्रमुखाश्चासन्पत्न्य आनकदुंदुभेः ४५ बलं गदं सारणं च दुर्मदं विपुलं ध्रुवं वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ४६ सुभद्रो भद्रबाहुश्च दुर्मदो भद्र एव च पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन् ४७ नंदोपनंदकृतकशूराद्या मदिरात्मजाः कौशल्या केशिनं त्वेकमसूत कुलनंदनं ४८ इलायामुरुवल्कादीन्यदुमुख्यानजीजनत् ४९ विपृष्ठो धृतदेवायामेक आनकदुंदुभेः शांतिदेवात्मजा राजन्प्रशमप्रसितादयः ५० राजन्यकल्पवर्षाद्या उपदेवासुता दश वसुहंससुवंशाद्याः श्रीदेवायास्तु षट् सुताः ५१ ॥ ॥

रोचनायाः सुताः जाता हस्तहेमां गदादयः ४९ तु टि

४० मग्रहीत् ३९ शिशुपालः सुतः तस्याः कथितः तस्य संभवः देवभागस्य कंसायां चित्रकेतुबृहद्बलौ

स्येति नवभिः श्लोकार्धैः पुत्रांश्चाह पौरवीत्येकादशभिः ४५ कौशल्याभद्रा ४६ ४७ ४८ ४९ ५० ५१

प्र० ३ अ० २४

अष्टमस्तु स्वयमेवासीत् न तु कर्मादीनां हेतुत्वमित्याभ्यां ‑ तावायं तत्सो हरिः न देवो यया दयति यदेति त्रिभिः
ईशस्य मायां विनेशस्य परस्य द्रष्टुः साक्षिण आत्मनः सर्वगस्य नह्येवं भूतस्य मायां विना जन्मनः कर्मणो वा हे
तुर्भवतीत्यर्थः ५७ किंच यस्य मायाचेष्टितं पुंसोऽनु ‑ ग्रहस्तस्य सर्वजीवानुग्राहकस्य कृतः कर्मादिपार

देवरक्षितया लब्धा नव चात्र गदादयः वसुदेवः सुतानष्टावादधे सहदेवया ५२ पुरुविश्रुतमुख्यां
स्तु साक्षाद्धर्मो वसूनिव वसुदेवस्तु देवक्यामष्ट पुत्रानजीजनत् ५३ कीर्तिमन्तं सुषेणं च भ
द्रसेनमुदारधीः ऋजुं संमर्दनं भद्रं संकर्षणमहीश्वरं ५४ अष्टमस्तु तयोरासीत्स्वयमेव हरिः
किल सुभद्रा च महाभागा तव राजन्पितामही ५५ यदा यदेह धर्मस्य क्षयो वृद्धिश्च पाप्मनः
तदा तु भगवानीश आत्मानं सृजते हरिः ५६ न ह्यस्य जन्मनो हेतुः कर्मणो वा महीपते आ
त्ममायां विनेशस्य परस्य द्रष्टुरात्मनः ५७ यन्माया चेष्टितं पुंसः स्थित्युत्पत्त्यप्ययाय हि अनुग्रह
स्तन्निवृत्तेरात्मलाभाय चेष्यते ५८ अक्षौहिणीनां पतिभिरसुरैर्नृपलाञ्छनैः भुव आक्रममाण
कर्मा नामभाराय कृतोद्यमः ५९ कर्माण्यपरिमेयाणि मनसापि सुरेश्वरैः सह संकर्षणश्चक्रे भग
२ वान्मधुसूदनः ६० कलौ जनिष्यमाणानां दुःखशोकतमोनुदं अनुग्रहाय भक्तानां सुपुण्यं व्य
तनोद्यशः ६१ यस्मिन्सत्कर्णपीयूषे यशस्तीर्थवरे सकृत् श्रोत्राञ्जलिरुपस्पृश्य धुनुते कर्मवासनाम्

तेषां जन्मादिसंभवः अनुग्रहमेवाह हि यस्मात् देवस्थित्यादयः एते प्रलये लीनोपाधेर्जीवस्य धर्माद्य
संभवात् उपाधिसृष्ट्यादिना धर्मादिसंपादनेनानुग्रहः तथा तन्निवृत्तेरात्मलाभाय च चेष्टितं तदेतत् तेन च मायया
मायेन तस्य स्थित्यादेर्निवृत्तिः ५८ तस्य चेष्टितं भूभारहरणार्थमेवाह अक्षौहिणीनामिति द्वाभ्यां भूभाराय

संकल्पमात्रेणाभूमिभारासमर्थपापिकर्मकरणं यशो विस्तारयामास अनुग्रहार्थमित्याह कलाविति द्वाभ्यां दुःख
घ्नो कृतमां श्रोतॄणां निःसिद्ध दलीति तथा तयोः श्रुते तानयस्मिन् सतां कर्णपीयूषमुदस्य नुपनीर्थके आत्मनि वांजलिः
पानमात्रेणयतः पुरुषः सकृदपि उपस्पृश्य आचमनमात्रं कृत्वा तमो दर्पाकृष्टचित्तः कर्मवासनाभुज्यते ६२
नदेवाह द्वाभ्यां भोजादिभिः श्लाघनीयमीहितं यस्य सर्वाणि रम्याणि यस्यावि ६४ तत्प्रदर्शनार्थमुखशोभामा
ह यस्याननं दृशिभिर्नेत्रैः पिबन्त्यो नार्यो नराश्च न ततृपुः नतृप्ताः निमेषाय निमेषमात्रमावर्धयाय यथा सहनानास्त

भोजवृष्ण्यंधकमधुशूरसेनदशार्हकैः श्लाघनीयेहितः शश्वत्कुरुसृंजयपाण्डुभिः ६३ स्निग्ध।
स्मितेक्षितोदारैर्वाक्यैर्विक्रमलीलया नृलोकं रमयामास मूर्त्या सर्वांगरम्यया ६४ यस्यान
नं मकरकुंडलचारुकर्णभ्राजत्कपोलसुभगं सविलासहासं नित्योत्सवं न ततृपुर्दृशिभिः पिबं
त्यो नार्यो नराश्च मुदिताः कुपिता निमेश्च ६५ जातो गतः पितृ[illegible] गृहाद्व्रजमेधि
तार्थो हत्वा रिपून्सुतशतानि कृतोरुदारः उत्पाद्य तेषु पुरुषः क्रतुभिः समीजे आत्मानमात्मनि।
गमं प्रथयञ्जनेषु ६६ पृथ्व्याः स वै गुरुभरं क्षपयन् कुरूणामन्तःसमुत्थकलिना युधि भूपचम्वः
दृष्ट्या विधूय विजये जयमुद्विघोष्य प्रोक्त्वोद्धवाय च परं समगात्स्वधाम ६७ इति श्रीभागवते नव
मस्कंधे यदुवंशानुचरिते चतुर्विंशोऽध्यायः २४ समाप्तोऽयं नवमस्कंधः ॥

त्व तु निमेः कुपिताश्च व भ्रुकुटय भूतमाननं मकरकुंडलाभ्यां च हृत्कर्णौ भ्राजंतौ कपोलौ च नेः ... सवि।
लासहासाय स्मिन् नित्यमुत्सवो यस्मिं ६५ श्रीकृष्णचरितं समासेनोपवर्णयति जातइति द्वाभ्यां जातोनि
जेन रूपेण ... पुरुषो मनुष्याकारः सन्व्रजं गतः व्रजवासिनामेधिताः अर्था येन तेषु दारेषु सुतानां शतानि आत्मा
या आत्मनिगमस्वकीयं वेदमार्गं ... नः समुत्थकलिना निमित्तेन उरुभरं क्षपयन् दृष्ट्यैव भूपचमूर्विधूय जि।
त्वा अर्जुनमर्जुनजिनेरण्येव मया देवकृत्वा परं तत्त्वं तथा पदिश्य स्वधाम सम्यक् केनैव रूपेणाजगामेति ६७ ३